॥ ॥ गणपतिखंडप्रारंभ ॥ ॥श्री॥ ॥

॥श्रीगणेशायनमः॥ ॥श्रीकृष्णायगोपीजनवल्लभायनमः॥ ॥नारदउवाच॥ श्रुतंप्रकृति
खंडंतेअमृतान्नर्णवमुत्तमं ॥ सर्वोत्कृष्टमभीप्सितंचमूढानांज्ञानवर्द्धनं ॥ अधुनाश्रोतुमिच्छामिगणेशखं
डमीश्वर ॥ तज्जन्मचरितंनृणांसर्वमंगलमंगलं ॥२॥ कथंजज्ञेसुरश्रेष्ठःपार्वत्याउदरेमुने ॥ देवीकेन
प्रकारेणलेभेतादृशंसुतं ॥३॥ सवांशःकस्यदेवस्यकथंलब्धोन्नसत्तम ॥ अयोनिसंभवःकिंवाकिं
वासौयोनिसंभवः ॥४॥ किंवातद्ब्रह्मतेजोवाकिंज्ञानेवपराक्रमः कालपस्याचकिंज्ञानंकिंवातन्निर्मलं
यशः ॥५॥ कथंतस्यपुरःपूजाविश्वेषुनिखिलेषुच ॥ खिलेनारायणेशंभोजगदीशेचब्रह्मणि ॥६॥ पुराणे
षुनिगुढंचतज्जन्मपरिकीर्त्तनं ॥ कथंवागजवक्त्रोयमेकदंतोमहोदरः ॥७॥ एतत्सर्वसमाचक्ष्वश्रोतुंकौ ॥१॥
तूहलंमम ॥ सुव्यक्तीर्णमहाभागतदतीवमनोहरं ॥८॥ ॥श्रीनारायणउवाच॥ शृणुनारदवक्ष्या
मिरहस्यंपरमाद्भुतं ॥ पापसंतापहरणंसर्वविघ्नविनाशनं ॥९॥ सर्वमंगलदंसारंसर्वश्रुतिमनो

हरं ॥ सुखदंमोक्षबीजंचकर्म्ममूलनिकृंतनं ॥१०॥ दैत्यार्दितानांदेवानांतेजोराशिसमुद्भवा ॥ देवीसंहृत्यदे
त्योघान्दक्षकन्याबभूवह ॥११॥ साचनाम्नासतीदेवीस्वामिनोनिंदयापुरा ॥ देहंसंहृत्ययोगेनजाताशैल(
गव प्रियोदरे ॥१२॥ शंकरायददौतांचपार्वतींपर्वतोमुदा ॥ तांगृहीत्वामहादेवोजगामनिर्जनंवनं ॥१३॥ शय्यांर(
तिकरींकृत्वापुष्पचंदनचर्चितां ॥ सरेमेनर्म्मदातीरेपुष्पोद्यानेतयासह ॥१४॥ सहस्रवर्षपर्य्यंतंदेवमानेन
नारद ॥ तयोर्बभूवशृंगारंविपरीतादिकंपरं ॥ दुर्गांगस्पर्शमात्रेणकामेनमूर्छितःपरः ॥ मूर्छितासाशिवस्पर्शा
त्रबुबुधेनदिवानिशं ॥१६॥ हंसकारंडवाकीर्णेपुंस्कोकिलरूतश्रुते ॥ नानापुष्पवीकसीतेभ्रमरध्वनिसंयु
ते ॥१७॥ सुगंधीकुसुमोत्केनवायुनासुरभीकृते ॥ अतीवसुखदेरम्येसर्वजंतुविवर्जिते ॥१८॥ दृष्ट्वातयोस्तत
शृंगारंचिंताप्रापसुराःपरं ॥ ब्रह्माणंचपुरःकृत्ययगुःनारायणाश्रमं ॥१९॥ तेनत्वाकथयामासब्रह्मावृ
त्तांतमीप्सितं ॥ संतस्थुर्देवीताःसर्वाश्चित्रपुत्तलिकायथा ॥२०॥ ब्र॥ ह्मोवाच॥ सहस्रवर्षपर्य्यंतंदेवमाने

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नसंकर ॥ रतोरतश्च निश्चेष्टो न योगी विरराम ह ॥ २१ ॥ मैथुनस्य विरामं च दंपत्योर्जगदीश्वर ॥ किं भूतं भ(
वितापत्यं तत्त्वः कथयितुमर्हसि ॥ २२ ॥ श्रीभगवानुवाच ॥ चिंता नास्ति जगद्धातः सर्वं भद्रं भविष्यति ॥ मयि
येशारणा पश्चात्तेषां दुःखं कृतं विधे ॥ २३ ॥ येनोपायेन तद्वीर्य्यं भूमौ पतति निश्चितं ॥ तत्कुरुष्व प्रयत्नेन
सार्द्धं देवगणेन च ॥ २४ ॥ पपात तच्छंभोर्वीर्य्यं तत्पार्वत्या उदरे यदि ॥ ततोपत्यं च भविता सुरासुरविमर्दकं
२५ तदा शक्रादयः सर्वे सुरा नारायणाज्ञया ॥ प्रययौ नर्मदातीरं पयो ब्रह्मा निजालयं ॥ २६ ॥ तत्रैव प
र्वतद्रोणीवहिर्देशा सुराः पुराः ॥ विषण्णवदनाः सर्वे बभूवुर्भयकातराः ॥ २७ ॥ शक्रः कुवेरमवदत्कुवेरो
वरुणं तथा ॥ वरुणः पवनं प्राह यमं चैव समीरणः ॥ २८ ॥ यमस्तु प्रेरयामास कृतांतं भास्करं स च ॥ भा ॥ २ ॥
स्करो रजनीनाथं स्वयं सोप्यागमादरं ॥ २९ ॥ एवं देवाः प्रेरयंति देवाश्च रतिभंजने ॥ हरशृंगारभंगं च कुर्वि
त्युक्ताः परस्परं ॥ ३० ॥ द्वारिस्थितो वक्रशिराः शक्रोवाच महेश्वरं ॥ ३१ ॥ इंद्र उवाच ॥ किं करोषि महादेव यो

गीश्वर नमोस्तु ते ॥ जगद्रक्ष जगद्बीज भक्तानां भयभंजन ॥ हरिर्जगामेत्युक्त्वैवमाजगाम च भास्करः ॥
॥ सूर्य्य उवाच ॥ किं करोषि महादेव जगतां परिपालकः ॥ सुरस्त्रष्ट महाभाग पार्वतीश नमोस्तु ते ॥ ३३ ॥ इत्ये(
वमुक्त्वा श्रीसूर्य्यः प्रजगाम भयातुरः ॥ आजगाम तदा चंद्र उवाच नतकंधरः ॥ ३४ ॥ चंद्र उवाच ॥ किं करोषि म
हादेव त्रिलोकेश नमोस्तु ते ॥ स्वात्मारामः पूर्णकामः पुण्यश्रवणकीर्त्तन ॥ ३५ ॥ इत्येवमुक्त्वा भीतस्तु विरराम(
निशापतिः ॥ आगत्योवाच द्वारस्थः स्वयमेव समीरणः ॥ ३६ ॥ पवन उवाच ॥ किं करोषि जगन्नाथ जगद्वं(
द्यो नमोस्तु ते ॥ धर्मार्थकाममोक्षाणां बीजरूप सनातन ॥ ३७ ॥ इत्येवं स्तवनं श्रुत्वा योगज्ञानविशारदः ॥ स्य
कुवा कामी न तत्याज शृंगारं पार्वती भयात् ॥ ३८ ॥ दृष्ट्वा सुरान्भयार्त्तांश्च पुनस्तोतुं समुद्यतान् ॥ विजहौ
सुखसंभोगं कंबलग्रीं च पार्वती ॥ ३९ ॥ उत्तिष्ठतो महेशस्य त्रस्तस्य लज्जितस्य च ॥ भूमौ पपात तद्वीर्य्यं
त तस्कंदो बभूव ॥ ४० ॥ पश्चात्तां कथयिष्यामि कथामतिमनोहरां ॥ स्कंदजन्मप्रसंगे च सांप्रतं वांछितं शृ

ए॥ध१॥ ॥इतिश्रीब्रह्मवैवर्त्तेमहापुराणेनारायणनारदसंवादेगणपतिखंडेप्रथमोऽध्यायः॥ ॥
॥२॥ ॥नारायणउवाच॥ त्यक्त्वारतिमहादेवोददर्शपुरतःसुरान् पलायध्वमित्युवाचकृपयापार्वती
भयात् १ देवाःपलायिताःभीताःपार्वतीशापहेतुना ब्रह्मांडेसर्वसंहर्त्ताचकंपेपार्वतीभयात् २ तत्यादु
त्थायसादुर्गानचदृष्ट्वापुरःसुरान् समुत्थितंकोपवह्निंस्तंभयामासदेहतः ३ अथप्रभृतितेदेवाव्यर्थवी
र्याभवंतिहति शशापदेवीतान्देवान्तिरुष्टाबभूवह ४ ततःशिवःशिवांदृष्ट्वाक्रोधसंरक्तलोचना
रुदंतीनम्रवदनांलिखंतीधरणीतलं ५ शिवस्तांदुःखितांदृष्ट्वाबोधयामासवक्षसि अत्यंतभीतःसं
त्रस्तउवाचमधुरंवचः शंकरउवाच कथंरुष्टागिरिश्रेष्ठकन्येधन्येमनोहरे ममसौभाग्यरूपेचप्रा
ब्रं.ज णाधिष्ठातृदेवते ७ किंतेभीष्टंकरिष्यामिवदगहंबिके ब्रह्मांडसंघेनिखिलेकिमसाध्यमिहाबयोः ३
८ अहोनिरपराधंमांप्रसन्नाभवसुंदरि देवाद्यज्ञानदोषस्यक्षांतिमेकर्त्तुमर्हसि ९ त्वयायुक्तःशिवो

हंचसर्वेषांशिवदायकः त्वयाहंविनानहीशश्चशवतुल्योऽशिवःसदा १० प्रकृतिस्त्वंचबुद्धिस्त्वंशक्तिस्त्वंच
क्षमादया तुष्टिस्त्वंचतथापुष्टिःशांतिस्त्वंक्षांतिरेवच ११ क्षुत्त्वंतृष्णात्वंतथानिद्रातंद्राश्रद्धासुरेश्वरि सर्वाधा
रस्वरूपात्वंसर्वबीजस्वरूपिणी १२ स्मितपूर्वंवदस्ववचःमाकुतंसरसंशिवे तवकोपविषंदग्धंतनेजीनेव
यमामृतं १३ शंकरस्यवचःश्रुत्वाकोपयुक्ताचपार्वती उवाचमधुरंदेवीहृदयेनविदूयता॥ पार्वत्यु
वाच॥ किंवाहंकथयिष्यामिसर्वज्ञंसर्वरूपिणं स्वात्मारामंपूर्णकामंसर्वदेहेष्वपिस्थितं १५ कामि
नीमनसःकामंमप्राज्ञस्वामीनंवदेत् सर्वेषांहृदयज्ञंचहृदिष्टंकथयामिकिं १६ सुगोप्यंसर्वनारीणांल
ज्जाजनककारणं अकथ्यमपिसर्वासांतथापिकथयामिते १७ सुखंमध्येस्त्रीणांचविभवेषुसुरेश्वर स
त्युंसांसहसंभोगोनिर्जनेषुपरंसुखं १८ तदृगेनचयदुःखंतत्सर्वमंनास्तिचस्त्रियाः कांतानांकालविच्छेदशो
कःपरमदारुणं १९ कृष्णपक्षेयथाचंद्रःक्षीयमाणोदिनेदिने तथाकांतंविनाकांताहीनांकांतरसःणेहृ

णे॥२०॥चिंताज्वरश्च सर्वेषामुपतापश्च वाससां॥साध्वीनां कांतविच्छेदः स्त्रीरंगाणां च मिथुनं॥२१॥रत्नभंगो
दुःखमेकं द्वितीयं वीर्य्यपातकं॥दुःखातिरेकदुःखं च तृतीयमनपत्यता॥२२॥त्रैलोक्यकांतकांतं त्वां लब्ध्वा
लब्धो न मे सुतः॥या स्त्री पुत्रविहीना च जीवनं दत्तसार्थकं॥२३॥जन्मांतरसुखं पुण्यं तपोदानसमुद्भवं॥स
द्वंशजातपुत्रश्च परत्रेह सुखप्रद॥२४॥सुपुत्रः स्वामिनोंऽशश्च स्वामितुल्यसुखप्रदः॥कुपुत्रश्च कुलांगा
रो मनस्तापाय केवलं॥२५॥स्वामी स्वांशेन स्त्रीस्त्रीणां गर्भे जन्म लभेध्रुवं॥साध्वा स्त्री मातृतुल्या च संततं
हितकारिणी॥२६॥असाध्वी वैरतुल्या च शश्वत्संतापदायिका॥मुखदुष्टा योनिदुष्टा चेवासाध्वीति विस्मृ
ता॥२७॥कमुपायं करिष्यामि वद योगेश्वरेश्वर॥उपायसिद्धं तपसां सर्वेषां च फलप्रद॥२८॥इत्युक्त्वा पा
र्वती देवी नम्रवक्त्रा बभूव सह॥प्रसन्नः शंकरो देवो बोधयामास पार्वतीं॥२९॥सत्पुत्रबीजं सुखदं संताप
नाशकारणं॥मिलं स्निग्धं सुरुचिरं प्रवक्तुमुपचक्रमे॥३०॥ ॥इति श्रीब्रह्मवैवर्ते महापुराणे नारायण ॥४॥

नारदसंवादे गणपतिखंडे द्वितीयोऽध्यायः॥२॥ ॥महादेव उवाच॥ शृणु पार्वति वक्ष्यामि तव भद्रं भविष्य
ति उपायतः काकार्य्यसिद्धिर्भवेदेव जगत्त्रये॥१॥सर्ववांछितसिद्धस्य बीजरूपं सुमंगलं॥मनसः प्रीतिज
ननमुपायं कथयामि ते॥२॥हरेराराधनं कृत्वा दत्तं गुरुवराननं॥व्रतं च पुण्यकं नाम वर्षमेकं करिष्यसि
॥३॥महाकठोरबीजं च वांछाकल्पतरूपरं॥सुखदं पुण्यकं नाम पुण्यपत्रं दसंपदः प्रदं॥४॥नदीनां च य
था गंगा देवानां च हरिर्यथा॥वैष्णवानां यथाहं च देवीनां च यथा प्रिये॥५॥आश्रमाणां यथा विप्रस्तीर्था
नां पुष्करो यथा॥पुष्पाणां पारिजातं च पत्राणां तुलसी यथा॥६॥यथा पुण्यप्रदानां च तिथिरेकादशी स्मृ
ता॥रविवारश्च वाराणां यथा पुण्यप्रदः शिवे॥७॥मासानां मार्गशीर्षश्च ऋतूनां माधवो यथा॥संवत्स
रो वत्सराणां युगानां च कृतं यथा॥८॥वृंदावनं वनानां च शांतरूपा च योषितां॥यथा काशी पुराणां च सूर्य्य
स्तेजस्विनां यथा॥९॥यथेंदुः सुखदानां च सुंदराणां च मन्मथः॥शास्त्राणां च यथा वेदाः सिद्धानां कपिलो

यथा १० हनूमान्वानराणांचक्षेत्राणांब्रह्मणाननं यशोदानांयथाविद्याकविताचमनोहरा ११
आत्माकालोयथापक्वानांमंगलानांलोचनंयथा विभवानांहरिकथासुखानांहरिसेवनं १२ स्पर्शानांपुत्रसं
स्पर्शोहिस्त्राणांयथाखल पापानांचयथामिथ्यापापीनांपुंश्चलीयथा १३ पुण्यानांचयथासत्यंतपसां
हरिसेवनं यथाघृतंगव्यानांयथाब्रह्मातपस्विनां १४ अमृतंमनुवस्तूनांमस्यानांधान्यकंयथा
पुण्यदानांयथातोयंशुद्धानांचहुताशनः १५ सुवर्णंतेजसानांचमिष्टानांप्रियभाषणं गरुडःप
क्षिणांचैवहस्तिनांमिंद्रवाहनं १६ योगीनांचकुमारश्चदेवऋषीणांचनारदः गंधर्वाणांचित्ररथोजी
वोबुद्धिमतांयथा १७ सुकवीनांयथाशुक्रःकाव्यानांचपुराणकं स्रोतस्वतांसमुद्रश्चयथापृथ्वीक्ष ५
मावतां १८ लाभानांचयथाभक्तिर्हरिभक्तिश्चसंपदां पवित्राणांवैष्णवश्चवर्णानांप्रवरोयथा १९
विष्णुमंत्रश्चमंत्राणांबीजानांप्रस्तलिर्यथा विदुषांचयथावाणीगायत्रीछंदसांयथा २० यथाकुवे

कुबेरोयक्षाणांसर्पाणांवासुकीयथा यथापितानेशैलानांगवांचसुरभीयथा २१ वेदानांसामवेदश्च
तृणानांचयथाकुशः सुखदानांयलक्ष्मीर्मनश्चशीघ्रगामिनां २२ अक्षराणांमकारश्चहितैषीणांयथा
पिता शालिग्रामश्चयंत्राणांपशूनांविष्णुपंजरः २३ चतुष्पदानांपञ्चास्यामानवोजीविनांयथा यथा
स्वांतमिंद्रियाणांमदाप्रिश्चरुजांयथा २४ बलिनांचयथाभक्तिरहंशक्तिमतांयथा महाविराट्स्थू
लानांसूक्ष्माणांपरमाणुकः २५ अस्त्राणांचयथास्त्राणांचक्राणांचसुदर्शनं नृणांश्रीरामचंद्रश्चवीरा
णांलक्ष्मणोयथा २६ सर्वधारःसर्वसेव्यःसर्वबीजंचसर्वदाः सर्वसारोयथाकृष्णोव्रतानांपुण्यकंतथा
२७ व्रतंकुरुमहाभागेत्रिषुलोकेषुदुर्लभं सर्वसारश्चपुत्रस्तेव्रतादेवभविष्यति २८ व्रताराध्य
श्रीकृष्णःसर्वेषांवांछितप्रदः जनोयत्सेवनान्मुक्तःपितृभिःकोटिभिःसह २९ हरिमंत्रमुपादाय
हरिसेवांकरोतियः भारतेजन्मसफलंस्वात्मनःसकरोतिच ३० उद्धृत्यकोटिपुरुषान्वैकुंठंयाति

निश्चितं श्रीलक्ष्मपार्षदो भूत्वा सुखं तत्रैव मोदते ३१ महोदरान्स्वभृत्यांश्च स्वबंधून्सहचारिणां स्व
स्त्रियं च समुद्धृत्य नरो याति हरेः पदं ३२ तस्माद्व्रतानां गिरिजे हरेरस्मं त्रं सुदुर्लभं जपमंत्रं व्रतेनत्र
पितॄणां मुक्तिकारणं ३३ इत्युक्त्वा शंकरो देवो गत्वा गिरिजया सह शीघ्रं गोजाह्नवीतीरं हरेर्मंत्र
मनोहरं ३४ तस्मै ददौ च संप्रीत्या कवचं स्तोत्रसंयुतं पूजाविधाननियमं कथयामास तां मुने ३५
इतिश्रीब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखंडे तृतीयोध्यायः ३ नारायण
उवाच श्रुत्वा व्रतान्निमानं च दुर्गा प्रहृष्टमानसा सर्वव्रतविधानं च संप्रष्टुमुपचक्रमे १ पार्वत्युवाच
सर्वव्रतविधानं मां वद वेदविदां वर हरेनायकरूणासिंधो दीनबंधो परात्पर २ कानि व्रतोपयुक्तानि द्र ६
व्याणि च फलानि च समयं नियमं यत्स्यं विधानं तत्फलं विभो ३ देहि मह्यं विनीतायै नियुक्तं सत्पुरोहि
तं पुष्पोपहारान्विप्रांश्च द्रव्याहरणकिंकरान् ४ अन्यानि चोपयुक्तानि मया ज्ञातानि यानि च संनि

योजयतत्सर्वं स्त्रीणां स्वामीश्वर सर्वद ५ पिता कौमारकाले च सर्वपालनकारकः भर्त्ता मध्ये सुतः शेषे
त्रिधावस्था च योषितां ६ मतो शोकः प्राणतुल्यां दत्वा तत्स्वामिने सुतां स्वमातृ निर्वृतिमाप्नोति सन्तस्य स्वसुते
प्रियां ७ बंधुत्रययुता या स्त्री सा च नाथवती परा किंचिद्धीना मध्या च सर्वहीनाधमानुवेधि ८ एतेषां च
समीपस्था प्रशंस्या सा जगत्त्रये निंदितान्येषु संनस्था सर्वमेतत्कृतौ श्रुतं ९ सर्वात्मा भगवांस्त्वं च सर्व
माता च सर्ववित् देहि मह्यं पुत्रवरं स्वात्मनिर्वृत्तिहेतुकं १० स्वात्मबोधावमानेन महात्मनि निवेदितं स
र्वं तत्प्राज्ञि प्रायत्नेन व्रतं बोधयामि किं ११ इत्युक्त्वा पार्वती प्रित्याय माता स्वामिनः पदे कृपासिंधुश्च भगवान्
स्त्रवक्तुमुपचक्रमे १२ महादेव उ० शृणु देवी प्रवक्ष्यामि विधानं नियमं फलं फलानि चैव द्रव्याणि अलोप
याभिकानि च १३ विप्राणां शतकं शुद्धं फलं पुष्पोपहारकं किंकराणां च शतकं द्रव्याहरणकारणं १४
दासीनां शतकं दत्तं नियुक्तं च पुरोहितं सर्वव्रतविधानज्ञं वेदवेदांगपारगं १५ प्रवरं हरिभक्तानां स

र्द्दशंमानिनांवरं सनातन्कुमारमत्तुल्यंगृहाणव्रतहेतुके १८ देविशुद्धेचकालेनपरंनियमपूर्वकं माघ
शुक्लत्रयोदशीपात्रतारंनशुभः प्रिये १९ गात्रंसुनिर्म्मलंकृत्वाशिरःसंस्कारपूर्वकं उपोष्यपूर्वदिवसेवस्त्रं
प्रक्षाल्यप्रयत्नतः २० अरुणोदयवेलायांतस्मादुत्थायसुव्रती मुखप्रक्षालनंकृत्वास्नात्वाचनिर्म्मलेजले
आचम्ययत्नतः पुनोहरिस्मरणपूर्वकं दत्वार्घ्यंहरयेनत्वागृहमागम्यसत्वरं २१ धौतेचवाससीधृत्वा
ग्रंउपविश्यासनेशुक्लस्वीवाचनपूर्वकं पुरोहितस्यवरणंपुरःकृत्वाप्रयत्नतः २२ संकल्प्यवेदविहितंतंत्र
तमेतत्समाचरेत् व्रतेद्रव्याणिनित्यानिचोपचाराणिषोडश २३ देयानिनित्यंदेवशिवकृष्णायपरमात्म
ने आसनंस्वागतंपाद्यमर्घ्यमाचमनीयकं २४ मधुपर्कंचस्नानीयंवस्त्राणिभूषणानिच सुगंधिपुष्पं ॥८॥
धूपंचदीपनैवेद्यचंदनं २५ यज्ञसूत्रंचतांबूलंकर्पूरादिसुवासितं द्रव्याण्येतानिपूजायाश्चांगरूपाणि
सुंदरी २६ एतेषांकिंचिद्विहीनेनैवांगहानिः प्रजायते अंगहीनंचयत्कर्म्मचांगहीनोयथानरः २७

अंगहीनेनकार्येचफलहानिप्रजायते अशोनराशालंपुष्पंपारिजातस्यविसृवे २८ देयंप्रतिदिनंदुर्गेस्वा
त्मनोरूपहेतवे श्वेतचंपकपुष्पाणंलक्षमम्लानमीप्सितं २९ प्रदेयंहरयेनत्वावर्णसौदर्य्यहेतवे सहस्र
पत्रपद्मानांमम्लानंपुष्पलक्षकं ३० नत्वादेयंचहरयेमुखसौदर्य्यहेतवे नीलोत्पलानांलक्षंचदेयंकृत्वाप
यन्नतः ३१ व्रतांगमुतंदेवशिवक्षुषोरूपहेतवे हिमालयोद्भवंनलक्षंरुचिरंश्वेतचामरं ३२ प्रदेयं
केशवायेचकेशसौदर्य्यहेतवे अमूल्यरत्नरचितंदर्पणानांसहस्रकं ३३ देवंनारायणायैवभालसौ
दर्य्यहेतवे अमूल्यरत्नरचितकुंडलानांसहस्रकं ३४ प्रदेयंगोपीकोशायनासिकारूपहेतवे बंधूकपुष्प
लक्षंचदेयंराधेश्वरायच ३५ स्वस्योष्ठाधारयोश्चैवचारुसौंदर्यहेतवे मुक्ताफलानांलक्षंचदंतसौदर्य्यहे
तवे ३६ देयंगोलोकनाथायभक्तोलज्जनक्तिपूर्वकं रत्नगंडुकलक्षंचगंडसौदर्य्यहेतवे ३७ महादेवराय
दातव्यंव्रतेशैलेंद्रकन्यके रत्नपाशकलक्षंचदेयंब्रह्मेश्वरायच ३८ शाधस्थलरूपायप्राणेशिनक्ति

नोव्रते । कर्णभूषणयुगलक्षंच रत्नसारविनिर्मितं ३९ देयं सर्वेश्वरायैव वर्णसौदर्य्यहेतवे । माध्वीक
कलसानांच लक्षं रत्नविनिर्मितं ४० देयं विश्वेश्वरायैव स्वरसौदर्यहेतवे । सुधासंपूर्णकुंभानां सहस्रं
रत्ननिर्मितं ४१ देयं कृष्णाय सौंदर्यशिवकसौदर्य्यहेतवे । रत्नप्रदीपलक्षंच गोपवेषविधायिने ४२ देयं
किशोरवेशाय दृष्टिसौदर्य्यहेतवे । धुस्तुरकुसुमाकाररत्नपात्रसहस्रकं ४३ देयं गौरसकायैव गलसौद
र्य्यहेतवे । सद्रत्नसाररचितपद्मनालसहस्रकं देयं तत्तुकपालाय बाहुसौदर्य्यहेतवे । लक्षंच रक्तपद्मा
नां करसौदर्य्यहेतवे ४५ देयं गोपांगनेशाय नारायणिहरिव्रते । अंगुरायकुलक्षंच रत्नसारविनि
र्मितं ४६ अंगुलीनांच रूपार्थं देयं देवेश्वराय च । मणीद्रसारलक्षंच श्वेतवर्णमनोहरं ४७ देयं मुनी ॥ ८ ॥
द्रनाथाय नखसौदर्य्यहेतवे । सद्रत्नसारहाराणां लक्षंचातिमनोहरं ४८ देयं मदनमोहाय वक्षःसौ
दर्य्यहेतवे । सुपक्वश्रीफलानांच लक्षंच सुमनोहरं ४९ देयं सिद्धनाथाय स्तनसौदर्य्यहेतवे । सद्रत्न

वर्तुलाकारं पात्रलक्षं मनोहरं ५० देयं पद्मालयेशाय देहस्वरूपहेतवे । सद्रत्नसाररचितनाभिनांच सह
स्रं ५१ प्रदेयं पद्मनाभाय नाभिसौदर्यहेतवे । सरचितरथचक्रसहस्रकं पुनः पुनः ५२ नितंबसौदर्य्यार्थं
प्रदेयं चक्रपाणये । सुवर्णरत्नस्तंभानां लक्षंच सुमनोहरं ५३ प्रदेयं श्रीनिवासाय श्रोणिसौदर्य्यहेतवे । शा
लपत्रस्थलानांच लक्षमम्लानमप्लकं ५४ प्रदेयं पद्मपत्राय पादसौदर्य्यहेतवे । सुवर्णरचितानांच खंजना
नां सहस्रकं ५५ गतिसौदर्य्यहेत्वर्थं देयं लक्ष्मीश्वराय च । राजहंससहस्रकं ५६ सुवर्णरचितं देयं हरये
गतिहेतवे । सुवर्णछत्रलक्षंच देयं नारायणाय च ५७ विचित्ररत्नसारेण स्रग्ध्वजः सौदर्य्यहेतवे । मालतीनां
च कुसुमं मल्लीलक्षमीश्वरि ५८ देयं वृंदावनेशाय हास्यसौदर्य्यहेतवे । अमूल्यरत्नलक्षंच देयं नारा
यणाय च । सुचंद्रव्रतपूर्णार्थं शीलसौदर्य्यहेतवे । शुद्धस्फटिकसंकाशं मणीद्रसारलक्षकं ६० देयं मु
नींद्रनाथाय मनःसौदर्य्यहेतवे । प्रवालसारसंकाशं माणिसारसहस्रकं ६१ देयं कृष्णाय मन्याचप्रिया

नुरागवृद्धये माणिक्यसारलक्षंच देयंकल्याय यत्नतः ६२ असंख्यजन्मपर्य्यंतंस्वामिसौभाग्यहेतवे
कुष्मांडंरानारिकेलंचजंबीरंश्रीफलंतथा ६३ फलान्येतानिदेयानिहरयेपुत्रहेतवे रत्नेंद्रसारलक्षं
चदेयंकल्यायतत्नतः जन्मनकोटिपर्य्यंतंस्वात्मनोधनवृद्धये वाद्यंनानाप्रकारंचकांस्यतालादिकंपरं
६५ व्रतेसंपत्तिवृद्ध्यर्थंश्रीहरिश्रावयेद्दतो पायसंपिष्टकंसर्पिःशर्करोक्तंमनोहरं ६६ प्रदेयंहरयेभक्त्या
स्वात्मनोनोगवृद्धये सुगंधिपुष्पमाल्यानांलक्षमत्तमाश्रितं ६७ प्रदेयंहरयेभक्त्याहरिनक्तिविव
वृत्तये नैवेद्यानिचदेयानिस्वादूनिमधुराणिच ६८ श्रीलक्ष्मीप्रीतिप्राप्त्यर्थंदुर्गेनानाविधानिच नाना
विधानिपुष्पाणितुलसीसंयुतानिच ६९ श्रीलक्ष्मीप्रीतयेभक्त्यारत्नदेयानिसुव्रते ब्राह्मणानांसह
स्रंचप्रत्यहंभोजयेद्व्रती ७० स्वात्मनःशास्यवृद्ध्यर्थंव्रतेजन्मनिजन्मनि पुष्पांजलिशतंदेयंनित्यंपूर्णं
चपूजये ७१ प्रणामशतकंदेविकर्त्तव्यंभक्तिवृद्धये परमासांश्चहविष्यान्नंमासानुपंचफलादिकं ५

७२ हविष्यस्यंजलस्पर्शंव्रतेमत्तंसुव्रतव्रतं रत्नप्रदीपशतकंवह्निरयादिवानिशं ७३ रात्रौकुशास
नंकृत्वानित्यंजागरणंव्रते स्मरणंकीर्त्तनंकेलिप्रेरणंगुह्यभाषणं ७४ संकल्पोऽध्यवसायश्चक्रि
यानिष्पत्तिरेवच मैथुनंविविधंत्याज्यंव्रतकीडाविवृद्धये ७५ ज्ञानवृद्धिजागरेणसुबुद्धिमूलभोजनं
लोभमोहकामक्रोधभयशोकविवादिकं ७६ कलहंचपरित्याज्यंव्रतेवधूविवृद्धये संपूर्णेचव्रतेदेवीप्र
तिष्ठातदनंतरं ७७ त्रिशतंचषष्ठ्याधिकंडत्वकंवस्त्रसंयुतं सभोज्यंसोपवीतंचसोपहारंमनोहरं ७८
त्रिशतंचषष्ठ्याधिकंसहस्रंविप्रभोजनं त्रिशतंचषष्ठ्याधिकंसहस्रंस्वर्णमेवच ७९ देयाव्रतसमाप्तौद
क्षिणानिविधिबोधिताः अन्यांसमाप्तिदिवसेकथयिष्यामिदक्षिणां ८० एतद्व्रतफलंदेवीदृष्ट्वानक्तिर्द
र्शनंवेत हरितुल्योभवेत्पुत्रोविख्यातोभुवनत्रये ८१ सौंदर्य्यंस्वामिसौभाग्यमैश्वर्य्यंविपुलंधनं सर्व
वांछितसिद्धानांबीजंजन्मनिजन्मनि ८२ इत्येवंकथितंदेवीव्रतंकुरुमहेश्वरि पुत्रस्तेभविताध्वी

मुक्त्वा सविरराम ह ॥४॥ इतिश्रीब्रह्मवैवर्त्तेमहापुराणेनारायणनारदसंवादेगणपतिखंडेव्रतवि
धानंनामचतुर्थोऽध्यायः ॥ श्रीनारायणउवाच ॥ कृत्वाव्रतविधानंचदुर्गाप्रहृष्टमानसा ॥ पुनःपप्रच्छ
कांतंसादिव्यांव्रतकथांशुभां ॥ पार्वत्युवाच ॥ किमद्भुतंश्रुतंनाथविधानंफलमस्यच ॥ अपिकांतकथांब्रूहि
कयाव्रतमिदंप्रकाशितं ॥ अथकथामहादेवउवाच ॥ शतरूपामनोःपत्नीपुत्रदुःखेनदुःखिता ॥ ब्रह्मणःस्था
नमागत्यसाब्रह्माणमुवाचह ॥ शतरूपाउवाच ॥ ब्रह्मन्केनप्रकारेणवंध्यायाश्चसुतोभवेत् ॥ तन्मेब्रूहि
जगद्धातः सृष्टिकारणकारण ॥ तज्जन्मनिष्फलंब्रह्मन्यस्यैश्वर्यंधनमेवच ॥ किंचित्तशोभतेगेहेविनापुत्रेण
पुत्रिणां ॥ तपोदानोद्भवंपुण्यंजन्मांतरसुखावहं ॥ सुखदोमोक्षदःप्रीतिदाताऽपुत्रश्चपुत्रिणां ॥ पुत्रीपु ॥१०॥
त्रमुखंदृष्ट्वाज्ञानाश्वमेधजंफलं ॥ पुन्नामनरकत्राणकारणंलभतेध्रुवं ॥ पुत्रोपायंयदिविधिवदमांतापसं
सुतां नदास्यसीदंचेत्त्वंतर्हिहत्यायास्यामिकारणेनतं ॥ गृहाणराज्यमैश्वर्यंधनंदत्वाप्रजावहं ॥ किमेतेना

रवयोस्तात्विनापुत्रैरपुत्रिणां ॥ अपुत्रिणोमुखंदृष्ट्वाविद्वान्नोस्महतेऽशिवं ॥ सुखंदर्शयितुंत्यक्तांसमवा
प्नोत्पुत्रकः ॥ अथवागरलंभुक्त्वाप्रवेक्ष्यामिहुताशनं ॥ अपुत्रंपुत्रमविवेकंगृहिणस्त्रीविहीनकं ॥ इत्येवमुक्त्वा
सास्त्राद्ब्रह्मणश्चपुरोरह ॥ कृपानिधिश्चतांदृष्ट्वाप्रवक्तुमुपचक्रमे ॥ ब्रह्मोवाच ॥ शृणुवत्सप्रवक्ष्यामिपुत्रोपायंसु
खावहं ॥ सर्वैश्वर्यादिजीवंचसर्ववांछाप्रदंशुभे ॥ माघशुक्लत्रयोदश्यांव्रतमेतत्सुपुण्यकं ॥ कर्त्तव्यंशुद्धकालेच
लक्ष्म्याराधनकेवलं ॥ सर्वत्संवत्सरंकर्त्तव्यंसर्वविघ्नविनाशनं ॥ वेदोक्तानिचद्रव्याणिव्रतेदेयानिसुव्रते ॥ व्रतंचका
रणेनोक्तंश्रीरवोक्तंसर्ववांछितसिद्धिदं ॥ कृत्वापुत्रंविष्णुर्लेभेशुभेविष्णुतुल्यपराक्रमं ॥ ब्रह्मणश्चवचःश्रु
त्वासाकृत्वाव्रतमुत्तमं ॥ प्रियव्रतोत्तानपादौलेभेपुत्रौमहेनाहरो ॥ व्रतंकृत्वादेवहूतिर्लेभेसिद्धेश्वरंसुतं ॥ ना
रायणांशंकपिलंपुण्यदंशुभं ॥ अरुंधतीदंकृत्वातुलेभेशक्तिसुतंशुभा ॥ शक्तिकांताव्रतंकृत्वासुतंलेभे
पराशरं ॥ अदितिश्चव्रतंकृत्वालेभेवामनकंसुतं ॥ शचीजयंतंपुत्रंचलेभेकृत्वेदमीश्वरी ॥ उत्तानपादप

त्वादं लेभे च नलकूवरं । सूर्य्यपत्नी मनुं लेभे कृत्वेदं व्रतमुत्तमं । अत्रिपत्नी सुतं चंद्रं लेभे कृत्वेदमुत्तमं । लेभे चांगी
रसः पत्नी कृत्वेदं व्रतमुत्तमं । बृहस्पतिं सुरगुरुं पुत्रमस्य प्रभावतः । भृगोर्भार्य्या व्रतं कृत्वा लेभे दैत्यगुरुं सुतं ।
शुक्रं नारायणांशं च सर्वतेजस्विनां परं । इत्येवं कथितं देवी व्रतानां व्रतमुत्तमं । त्वमेव कुरु कल्याणि हिमालय
सुते शुभे । साध्वी राजेंद्रपत्नीनां देवीनां च सुखावहं । व्रतमेतन्महासाध्वि साध्वीनां प्राणतः प्रियं । व्रतस्यास्य प्र
भावेन स्वयं गोपांगनेश्वरः । ईश्वरः सर्वदेवानां तव पुत्रो भविष्यति । इत्युक्त्वा शंकरस्तत्र विरराम च नारद व्रतं
चकार सा देवी प्रहृष्टा शंकराज्ञया । इत्येवं कथितं सर्वं किं भूयः श्रोतुमिच्छसि । सुखदं मोक्षदं सारं गणेशजन्मका
रणं ॥ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखंडे व्रतकथाप्रकरणं नाम पंचमो ॥२५॥
ऽध्यायः ॥ शौनक उवाच ॥ नारायणवचः श्रुत्वा नारदो हृष्टमानसः । किं पप्रच्छ पुनः साधो तन्मे ब्रूहि तपोधन ॥
सूत उवाच ॥ नारायणवचः श्रुत्वा नारदो हृष्टमानसः । व्रतारंभविधानं च संप्रष्टुमुपचक्रमे ॥ नारद उवाच

कृतं केन प्रकारेण व्रतमेतत्सुखावहं । तन्मे ब्रूहि मुनिश्रेष्ठ पार्वत्या भर्तुराज्ञया । लला न जन्मे गोपीशः कृते सुव्रत
या व्रते । व्रतं नु केन प्रकारेण तन्नः शंसितुमर्हसि । नारायण उवाच । कथयित्वा कथां दिव्यां विधानं च व्रतस्य च
स्वयं विधाता तपसां जगाम तपसे शिवः । हरेराराधनव्यग्रो मूर्त्तिभेदधरो हरिः । हरिभावनशीलश्च हरिस्मृतिप
रायणः । परमानंदपूर्णश्च ज्ञानानंदः सनातनः । दिवानिशं जनो याति हरिमंत्रं वहिः स्मरन् । प्रहृष्टमनसा देवी
पार्वती भर्तुराज्ञया । किंकरान्प्रेरयामास विप्रांश्च व्रतहेतवे । आनिय सर्वद्रव्याणि व्रतोपयोगिकानि च ।
व्रतं कर्तुं समारेभे सुद्रासा सुनेत्रणे । सनत्कुमारो भगवानाजगाम विधेः सुतः । मूर्त्तिमांस्तेजसां राशिः प्रज्व
लन् ब्रह्मतेजसा । ब्रह्माजगाम संहृष्टः स्वब्रह्मलोकात्सभार्य्यकः । अतिव्रस्तो हि भगवानाजगाम महेश्वरः ।
विष्णुः क्षीरोदशायी च सलक्ष्मीकश्चतुर्भुजः । भगवानुजगतां पाता शास्ता भर्त्ता सपार्षदः । वनमालाधरः श्या
मो भूषितरत्नभूषणैः । महांसंभृतसंभारो रत्नयानेन नारदः । सनकश्च सनंदश्च कपिलश्च सनातनः

असुराश्चप्रतांश्चकनुर्हंसोवोढुपंचशिखोऽरुणिर्यतिश्चसुमतिश्चैवसच्छिष्यमहानुग। पुलहश्चपुल
स्त्यश्चवशिष्टोभृगुरंगिरा। आगस्त्यश्चप्रचेताश्चदुर्वासाश्चवलस्तथा। वैमराभ्वःकश्यपःकणोजरत्का
रुश्चगोतमः। वृहस्पतिरुतथ्यसंवर्त्तशोनरिस्तथा जावालोजमदग्नीश्चयोगीसव्यश्चदेवल। गोकामुखंक
कश्चकरख। पारिभद्र। पराशार। विश्वामित्रोवामदेवोऽऋष्यशृंगोविभांडक मारकंडेयोमृकंडुश्चप्रकर्णो
लोमशस्तथा। कौशोवत्सश्चदत्तश्चकालाग्नीरघमर्षणः कत्यायनकणादश्चपाणीनिशाकटायन। शंकु
शपिशालिश्चैवशाकल्यःशंषएवच एतेचान्येचबहवःसशिष्यामनुयोमुने अवाचधर्मपौत्रेचनरनाराय
णोसरो दिक्पालाश्चतथादेवायक्षगंधर्वकिन्नराः आजग्मुःपर्वताःसर्वेसगणापार्वतीव्रते हिमालयः ॥१२॥
शैलराजःसाभोपत्यश्चसभार्याकः सगणःसानुगश्चैवरत्नभूषणभूषित। महासंभृतसंभारोनानानाद्र
व्यसमन्वितः। माणमाणिक्यरत्नानिव्रतोपयोगिकानिच नानाप्रकारवस्तुनिजगतांदुर्लभानिच - लक्षंच

गजरत्नानिमश्वरत्नंत्रिलक्षकं दशलक्षंगवारत्नंशतलक्षंसुवर्णकं रुचकानांहारकानांसुवर्णानांचतथै
वच मुक्तानांचचतुर्लक्षंकौसुंभानांसहस्रकं सुस्वादमिष्टद्रव्याणांलक्षभाराणिकौतुकी अनंतरत्नप्रभेदंश्चा
जगामसुताव्रते ब्राह्मणामनवःसिद्धानागाविद्याधरास्तथा भिक्षवोभिक्षुकाश्चैवनंदाभनःपार्वतीव्रते विद्याध
रानर्तकीचनर्त्तकीअप्सरसांगनांगणा नानाविधावाद्यनादाआजग्मुःशिवमंदिरं कैलाशशजमार्गश्चचंदनेन
सुसंस्कृतं अम्रपल्लवसुत्रोकंकदलास्तंभशोभितं दुर्वधान्यपर्णलाजफलपुष्पविभूषितां निर्म्मितंपञ्चश
गणदृद्वसुस्तगणामुदा ऊषुःसिंहासनेघवतैतेपूजिताःशंकरेणच कैलासवासिनःसर्वेपरमानंदसंयुताः
दानाध्यक्षःसुनासीरःकुवेरःकोषरक्षकः अन्येष्टाचस्वयंसुर्य्यःपरिवेष्टाजलाधिपः दध्नांनद्यःसहस्राणि
दुग्धानांचतथैवच सहस्राणिघृतानांचगुडानांचशतानिच माध्वीकानांसहस्राणितैलानांचशतानिच
लक्षाणिचैवतक्राणांबभूवुःपार्वतीव्रते पीयूषाणांचकुंभानिशतलक्षाणिनारद मिष्टान्नानांशर्कराणां

बभूवुर्लक्षराशयः। यवगोधूमचूर्णानां शतीकानां च नारद। स्वस्तिकानां च पूपानां ब्रह्मन्बभूवुर्लक्षराशयः। गुड
संस्कृतलाजानां बभूवुः कोटिराशयः। शालीनां पृथुकानां च राशीनां दशकोटयः। तंडुलानां च राशीनां मूल्य
संख्या न विद्यते। स्वर्णरौप्यप्रवालानां मणीनां च महामुने। बभूवुः पार्वतीसत्रे कैलासे पार्वतीव्रते। पयकं
संमिष्टकं चैव शाल्यन्नं सुमनोहरं। चकार लक्ष्मीः पाकं च व्यंजनं घृतसंस्कृतं। बभुजे देवर्षिगणैः सार्द्धं नाराय
णः स्वयं। बभुजुर्लक्षविप्राश्च परिवेशनकारकाः। तांबूलं च ददौ तेभ्यः कर्पूरादिसुवासितं। रत्नसिंहासन
स्थेभ्यो विप्रेभ्यो लक्षाः सुदक्षकाः। रत्नसिंहासनस्थं च विष्णुं क्षीरोदशायिनं। सेव्यमानं पार्षदैश्च सस्मितैः श्वेतचा
मरैः। ऋषिभिस्तूयमानं च सिद्धैर्देवगणैस्तथा। विद्याधरीणां नृत्यानि पश्यंतं सस्मितं मुदा। गंधर्वाणां च सं ॥१३॥
गीतं श्रुतं मनाक्पश्यंतं सस्मितं मुदा। गंधर्वाणां च संगीतं श्रुतवंतं मनोहरं। पप्रच्छ शंकरो ब्रह्मन्ब्रह्मेशं
भक्तिपूर्वकं। ब्रह्मणा प्रेरितो युक्तं व्रतकर्तव्यमीप्सितं। देवर्षिगणपूर्णायां सभायां सपुटांजलिः। म

हादेव उवाच। मदीयं प्रार्थनं नाथ श्रीनिवास शृणु प्रभो। तपःस्वरूप तपसां कर्म्मणां च फलप्रद। व्रतानां
जपयज्ञानां पूजानां सर्वपूजित। सर्वेषां बीजरूपेण वांछाकल्पतरो हरे। सुपुण्यकव्रतं कर्तुं ब्रह्मन्निच्छति पार्व
ती। पुत्रार्थिनी साशोकार्त्ता हृदयेन विदूयता। इति संगक्षते देवबीजव्यर्थं सुचार्दिता। प्रबोधिता मया साध्वी विवि
धैर्वचनामृतैः। सत्पुत्रं स्वामिसौभाग्यं सुव्रतायाश्च लेप्सिते। ताभ्यां विना च संतुष्टा स्वप्राणं त्यक्तुमिच्छति। पुरा त्य
क्त्वा च स्वदेहं च पितृयज्ञं च मानिनी। मच्छिरया शैलगृहे पुनर्जन्म लब्धवानसौ। सर्वज्ञानोसि सर्वज्ञं त्वां तं सर्वज्ञं त्वां वदा
मि किं कार्यं तां वद तत्त्वं परिणामशुभप्रदं। दुर्निवार्य्यश्च सर्वेषां स्त्रीस्वभावश्च चापलः। दुस्त्याज्यं योगिभिः
सिद्धैर्ज्ञानिभिश्च तपस्विभिः। जितेंद्रियैर्जितक्रोधैः स्त्रीरूपं मोहकारणं। ब्रह्मास्त्रं कामदेवस्य दुर्ल्लंघं जयकारणं।
सुनिर्मितं च विधिना सर्वाद्यं विधिपूर्वकं। मोक्षद्वारकपाटं च हरिभक्तिनिरोधनं। संसारबंधनस्तंभरज्जु
तपमक्षंतनं। वैराग्यनाशबीजं च शश्वद्रागविवर्द्धनं। पत्तनं साहसानां च दोषाणामालयं सदा। अप्रत्यया

नोलेत्रंचस्वयंकदमूर्त्तिमत्॥ अहंकाराश्चयंत्रास्वद्विषकुंभंसुधामुखे॥ सर्वैरसाध्यमानंचदुरराध्यंचस
र्वदा स्वकार्य्यंसाध्यंचासाध्यंकलहांकुरकारणं॥ सर्वंनिवेदितंनाथकर्त्तव्यंकर्तुमर्हसि॥ कार्य्यंसर्वपराम
र्षपरिणामसुखावहं॥ श्रीनारायणउवाच॥ इत्येवमुक्त्वाभगवान्निरीहस्यब्रह्मणोमुखं॥ विरराममसभामध्येसु
त्वाचकमलापतिः॥ शंकरस्यवचःश्रुत्वाभगस्यहस्यजगदीश्वरः॥ हितंमितंचवचनंप्रवक्तुमुपचक्रमे॥ विष्णुरु
वाच॥ पुण्यकव्रतसारंचसतीसंतानहेतवे॥ स्वामिसौभाग्यबीजंचपत्नीनेकर्तुमिच्छति॥ सर्वासाध्यंदुरारा
सुन्दरं ध्यंसर्वकामफलप्रदं॥ सुखसारंचमोक्षदंपार्वतीश्वर॥ सर्वेश्वरोव्रताराध्योगोपीशस्त्रिगुणात्परः॥ गोलोकना
थोभगवान्पूर्णब्रह्मसनातनः॥ सर्वाहरूपःसर्वदरूपःसर्वस्वेच्छामयपरः॥ आत्मासाक्षीस्वस्वरूपश्चज्योतिरू २५
पसनातनः॥ निराश्रयश्चनिर्लिंगोनिरुपाधिर्निरामयः॥ भक्तप्राणश्चभक्तेशोभक्तानुग्रहकातरः॥ दुराराध्यो
हियोन्येषांभक्तानांमतिसाध्यकः॥ भक्तिहीनोपिभगवान्सर्वसिद्धोहिनिष्फलः॥ योयस्यचकलाःपुंसोब्रह्म(

विष्णुर्महेश्वराः॥ महान्विराटदंश्चयस्यनिर्लिप्तःप्रकृतेःपरः॥ अयग्रोधिग्रहश्चोग्रोभक्तानुग्रहविग्रहः॥ ग्रहोग्र
होग्रहाणांचग्रहनिग्रहकारकः॥ त्रिकोटिजन्मसाध्यश्चनसाध्योभारतेविना॥ लब्ध्वाहिभारतेजन्मवहुशिवकिलत्रे
त्तरः॥ सेव्यनंलुइदेवानांकृत्वाम्रमसुजन्मसु॥ सूर्य्यमंत्रंमवाप्नोतिकेवलंसततदाशिषा॥ सूर्यमंत्रंसमासाराध्य
मायांनारायणीपरां॥ नारायणकलांसेवांसम्भावाप्नोतिमानवा॥ कलानिषेव्यवर्षेत्रपुण्यक्षेत्रेसुदुर्लभे॥ कृष्ण
भक्तिमवाप्नोतिभक्तसंसर्गहेतुकी॥ संप्राप्यभक्तिनिष्यंकांभ्रामंत्रामंचभारते॥ प्राप्नोतिपरिपक्वांचभक्तिंभक्त
निसेवया॥ तदाभक्तप्रसादेनदेवानामशिषाद्विव॥ श्रीकृष्णमंत्रमाप्नोतिनिर्वाणफलदंपरं॥ कृष्णव्रतंकृष्णमं
त्रंसर्वकामफलप्रदं॥ कृष्णतुल्योभवेद्भक्तोचिरंकृष्णनिषेवया॥ महतिप्रलयेयातःसर्वेषांससर्वनिश्चितं॥ भपा
तःकृष्णभक्तानांसाधूनामविनाशिनां॥ अविनाशिनिसोगोलोकेमोदंतेकृष्णकिंकराः॥ हसंतिलेपुनिश्चिताःदेवा
न्ब्रह्मादिकान्शिव॥ तंसंहर्त्तांचसर्वेषांभक्तानांमहेश्वर॥ मायामोहयतेसर्वान्भक्तान्नहिकृपामयः॥ माया॥

नारायणीमासर्वेषांकृष्णभक्तिप्रदा। नतस्यभक्तिप्राप्नोतिविनामायानिषेवनं। साचनारायणीमायामूल
प्रकृतिरीश्वरी। कृष्णप्रियाकृष्णभक्ताकृष्णतुल्याऽविनाशिनी। साचतेजस्वरूपाचस्वेछाविग्रहधारिणी। श्रीवि
ष्णोश्चदेवानांतेजसासुरनिग्रहे। निहत्यदैत्यानसर्वांश्चदक्षपत्न्यांचसारते। ललाभदक्षकन्यासाजन्मचानेकज
न्मनः। त्यक्त्वादेहंपितुर्यज्ञेसासतीपतिनिंदया। जगामदेवीगोलोकंकृष्णभक्तिःसनातनी। गृहीत्वाविग्रहंतस्यागुण
रूपाश्रयंपरं। आमंत्र्यामंत्रारतत्वंनिषण्णोहंपुरास्मर। प्रबोधितामयात्वंचश्रीशैलेषुसरित्तटे। ललाभजन्म
साशैलकांतायाजठरेणाच। करोतुपुण्यकंसाध्वीसुव्रतंशिवा। राजसूयसहस्राणांपुण्यंशंकरपुण्यके। राजसू
यसहस्राणांव्रतेयत्रधनव्ययः। तत्साध्यंसर्वसाध्वीनांव्रतमेतत्त्रिलोचन। स्वयंगोलोकनाथश्चपुण्यकस्यप्रभाव ॥२५॥
तः। पार्वत्यागर्भजातश्चतवपुत्रोभविष्यति। स्वयंदेवगणानांचयस्मादीशःकृपानिधिः। गणेशइतिविख्यातो
भविष्यतिजगत्त्रये। यस्मात्स्मरणमात्रेणविघ्ननिघ्नंभवेध्रुवं। जगतांहेतुनातेनविघ्नभिदोविभुः। नानावि
विघ्न

धानिद्रव्याणियस्मैयानिपुण्यके। भुक्त्वालंबोदरत्वंचतेनलंबोदरःस्मृतः। शनिदृष्ट्याशिरश्छेदाद्गजवक्त्रेणयो
जितः। गजाननशिशुस्तेननिषेकःकेनवार्य्यते। परशुनापरशुरामस्ययदेकदंतखंडनं। भविष्यतिनिषेकेनैकदं
तान्निधकःशिशुः। पूज्यश्चसर्वदेवानामस्माकंजगतांविभुः। सर्वाग्रेपूजनंतस्यभविताभद्वरेणवै। पूजासुसर्वदे
वानामग्रेसंपूज्यतंजनः। पूजाफलमवाप्नोतिनिर्विघ्नेनतथान्यथा। गणेशंचदिनेशंचवह्निंविष्णुंशिवंशिवां। दु
र्गामेतान्नसंसेव्यपूजयेद्देवतांतरं। गणेशपूजनेविघ्नंविघ्नंत्रिजगतांभवेत्। निर्व्याधिःसूर्य्यपूजायांशुचिःश्रीवि
ष्णुपूजने। मोक्षश्चपापनाशश्चयशश्चैश्वर्यवर्द्धनं। तत्वज्ञानंमुक्तानांबीजंशंकरपूजनं। सुबुद्धिसुस्त्रीसद्भूमिः
सत्पुत्राबंधुकारणं। हरिभक्तिप्रदंचैवपरंदुर्गार्चनंशिवं। निधनेसंस्कृताश्चिज्ञानमृत्युंलभेन्नरः। शतालोकाच
भवतिशंकराग्निनिषेवनात्। विपरीतंत्रिजगतामेतेषांपूजनंविना। एवंक्रमोमहादेवकल्पेकल्पेतिनिश्चितं। एतेष्वेव
विघ्नमानानित्याःसृष्टौपरायणाः। आविर्भावतिरोभावौचैतेषामीश्वरेच्छया। इत्युक्त्वाश्रीहरिस्तत्रविररामसभातले

प्रहृष्टा देवता विप्राः पार्वत्या सह संकरः॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखं
डे पुण्यकव्रताज्ञाग्रहणं नाम षष्ठोध्यायः नारायण उवाच हरेराज्ञां समादाय हरः प्रहृष्टमानसः उवाच
पार्वतीं प्रीत्या हरिसंतापमंगलं शिवाज्ञां तां समादाय शिवा प्रहृष्टमानसा वाद्यं च वादयामास समंगलं मंगल
व्रते शुभस्थाला सुदत्ता शुद्धा विभ्रमला धौतवाससी संस्थाप्य रत्नकलसं शुक्लधान्योपरिस्थितं आम्रपल्लव
संयुक्तं फलाक्षतसुशोभितं चंदनागुरुकस्तुरीरकुंकुमेन विभूषितं रत्नासनस्थारत्नाद्यारत्नोद्भवसुता
सती रत्नसिंहासनस्थं च संपूज्य पुरोहितं चंदनागुरुकस्तूरीरत्नभूषणभूषितं संस्थाप्य पुरतो भक्त्या दि
क्पालान् रत्नभूषितान् देवांतरांश्च नागांश्च समर्च्य विधिबोधितं समर्च्य परया भक्त्या ब्रह्मविष्णुमहेश्वरा ॥१६॥
न् चंदनागुरुकस्तुरीकुंकुमेन विराजितान् वह्निशुद्धांशुवस्त्रेण सद्रत्नभूषणेन च पूज्यान्यद्रव्यविभ
वैः संपूज्य पुण्यकेमुने समारंभे व्रतेदेवी स्वस्तिवाचनपूर्वकं आवाह्याभीष्टदेवं तं श्रीकृष्णं मंगलघटे न

त्यादरेक्रमेणैव सोपचाराणि षोडश यानि व्रतविधेयानि देयानि विविधानि च प्रददौ तानि सर्वाणि प्रत्ये
कं फलदानि व्रतोक्तमुपहारं च दुर्लभं भुवनत्रये तत्सर्वं ददौ भक्त्या सुव्रते सुव्रता सती हुत्वा द्रव्याणि सर्वा
णि वेदमंत्रेण सा सती मोहोमं कारयामास त्रिलक्षं तिलसर्पिषा ब्राह्मणान् भोजयामास देवतानि पि पूजि
तान् कर्त्तव्यत्वमेव कर्तव्यं सुव्रते सुव्रता सती प्रत्यहं सा व्रतावधानं च चकार पूर्णवत्सरं समाप्तिदिवसे विप्रतामु
वाच पुरोहितः सुव्रते सुव्रते मह्यं देहि तीपतिदक्षिणां श्रुत्वा पुरोहितोक्तं सा विलिप्य सुरसंसदि मूर्छां प्राप्य म
हामायामोहिता सा च चेतसा अंते च मूर्च्छितां दृष्ट्वा प्रहस्य मुनिपुंगवाः शंकरं प्रेरयामासु ब्रह्माविष्णुश्च ना
रदः संप्रेरितः शिवस्तेश्च शिवां बोधयितुं तदा शिवः समुद्यं मंचकेप्रवक्तुं वदतां वरः श्रीमहादेव उवाच अभिष्ट
भद्रे भद्रं ते भविष्यति न संशयः सांप्रतं चेतनं कृत्वा मदीयं वचनं शृणु शिवः शिवां तामित्युक्त्वा शुष्ककंठोष्टता
लुकाः वह्निसिस्थापयामास कारयामास चेतनं हितं सत्यं मितं सर्वं परिणामसुखावहं यशस्करं च फलदं प्र

वक्तुमुपचक्रमे शृणु देवी प्रवक्ष्यामि यद्वेदेन निरूपितं सर्वसम्मतमिष्टं च धर्म्माथ धर्म्मसंसदि सर्वेषां कर्म्मणां
देवी सारभूता च दक्षिणा यज्ञो दा फलदा नित्यं धर्म्मिष्टो धर्म्मकर्म्मणि दैवं वा पैत्रकं वापि नित्यं नैमित्तिकं प्रिये य
त्कर्म्म दक्षिणाहीनं तत्सर्वं निष्फलं भवेत् दाता च कर्म्मणा तेन कालसूत्रं व्रजेध्रुवं इहांते दैन्यमाप्नोति शत्रुणा प
रिपीडिता दक्षिणा विप्रमुद्दिश्य तत्कालं तु न दीयते तन्मुहूर्ते व्यतीते दक्षिणा द्विगुणा भवेत् चतुर्गुणा दिने
तीते पक्षे शतगुणा भवेत् मासे पंचशतगुणा षण्मासे लक्षचतुर्गुणा संवत्सरे व्यतीते तु तत्कर्म्म निष्फलं भवेत्
दाता च नरकं याति यावद्वर्षशतं शुभे पुत्रपौत्रधनैश्वर्यं क्षयमाप्नोति पातकात् धर्म्मो नष्टो भवेत्तस्य धर्म्महीने
च कर्म्मणि विष्णुरुवाच रक्षस्व धर्म्मं धर्म्मिष्ठे धर्म्मज्ञे धर्म्मकर्म्मणि सर्वेषां च भवेद्रक्षा स्वधर्म्मपरिरक्षणे ॥१७॥
ब्रह्मोवाच यश्च केन निमित्तेन न धर्म्मं परिरक्षति धर्म्मे नष्टे च धर्म्मज्ञो तस्य सर्वं विनश्यति धर्म्म उवाच मां र
क्षयत तः साध्वि भार्य्यपति दक्षिणा यस्मिन्स्थिते महासाध्वि सर्वं भद्रं भविष्यति देवा ऊचुः धर्म्मरक्ष महासाध्वि

कुरु पूर्णं व्रतं सति त्वयं तव व्रते पूर्णे कर्म्मस्ते पूर्णमानसं मुनय ऊचुः कृता साध्वि पूर्णा होमं देहि विप्राय दक्षि
णां स्थिरे वत्स्यासु स्तुवितैः किमन्यद्भविष्यति सनत्कुमार उवाच शिवे शिवं देहि मह्यं न चेद्व्रतफलं व्रते सुचारिं सं
वीतस्यापि स्व[illegible]न तपस फलं कर्म्मणः दक्षिणा साध्वि याजकस्य हि तत्फलं प्राप्नोति यजमानस्य संपूर्णं कर्म्मणः
फलं पार्वत्युवाच किं कर्म्मणा देवेशाः किमे दक्षिणाया मुने मुन किं पुत्रेण च धर्म्मेण यत्र भर्त्ता च दक्षिणा यदि
भूमिर्म्म धात्याका यदि वृक्षस्य देवताः गते च कारणे कार्य्यं कुलः शस्यं कुतः फलं प्राणास्तस्य काः स्वेच्छया वेदेहेन किं
प्रयोजनं दृष्टौ शक्ति वी हीने न चक्षुषा किं प्रयोजनं शत पुत्रा समा नारी साध्विया च सुरेश्वराः यदि भर्त्ता व्रते देयः
किं व्रतेन सुतेन वा भर्त्तुरंशात्मजस्तनयः केवलं भर्त्तुर्मूलकः यत्र मूलं भवेद्गुप्तं लक्षणा ज्यं च निष्फलं विष्णुरुवा
च पुत्रादपि परः स्वामी धर्म्मस्य स्वामिनः परः धनष्ट धर्म्मस्य धर्म्मिष्ठे स्वामिना किं सुतेन वा ब्रह्मोवाच स्वामिन
श्च परो धर्म्मो त्वं सत्यं च सुव्रते सत्यं संकल्पितं कर्म्म न तु भ्रष्टं कुरु व्रतं पार्वत्युवाच निरूपितश्च वेषु रुद्र । शा श्वध

नवाचकः तद्यस्यास्तीति सस्वामिवेदज्ञाश्रृणुंमद्वच तस्यदातासदास्वामिनश्चस्वंस्वामिनोभवेत् अहोव्य
वस्थाभवतांवेदज्ञानमबोधतां धर्म्मउवाच पत्नीविनान्यंस्वंसाधिस्वामिनंदातुमर्हयं दंपतिश्चैवमेकांगौ
दायोर्दानाचक्षौसमौ पार्वत्युवाच पितादयातियामात्रेसचगृह्णातितत्सुतां नस्मृतंविपरीतेचश्रुतौश्रुतौ
श्रुतिपरायणाः देवाऊचुः बुद्धिस्वरूपात्वंदुर्गेबुद्धिमंतोवयंत्वया वेदज्ञेवेदवादेषुकेवात्वांजेतुमीश्वरा
निरूपितापुण्यकेतुव्रतेस्वामिवदक्षिणा श्रुतौश्रुतोयःसधर्म्मोविपरीतोह्यधर्म्मक पार्वत्युवाच केवलंवेद
माश्रित्यकःकरोतिविनिर्णयं बलवाल्लौकिकोवेदाल्लोकाचारंचकःस्त्यजेत् वेदप्रकृतिपुंसोश्चगरीयानपु
रुषोध्रुवं निबोधिताःसुराःप्राज्ञाःबलाहंकथययामिकिं बृहस्पतिरुवाच नपुमांसंविनासृष्टीनसाध्वी १८
प्रकृतिविना श्रीकृष्णश्चद्वयोःस्रष्टासमौप्रकृतिपूरुषौ पार्वत्युवाच यःकृष्णःप्रकृतेःस्रष्टासोंशेनसगु
णःपुमान् पुमानुत्सारीरंप्रकृतेस्तथापिनततश्चसा एतस्मिन्नंतरेदेवामुनयस्तत्रसंसदि रत्नेंद्रसारनिर्मा

६ णमाकाशेददृशुःसुरथं पार्षदैश्चपरिव्रतंसर्वैःश्यामचतुर्भुजैः वनमालापरिवृतैरत्नभूषणभूषितैः अव
रुह्यततोयानादाजगामसभातलं तुष्टुवुस्तंसुरेंद्रास्तेदेवंवैकुंठवासिनं शंखचक्रगदापद्मधरमीशंचतु
र्भुजं लक्ष्मीसरस्वतीकांतंशांतंतंसुमनोहरं सुखदंपरमभक्तानामदृश्यंकोटिजन्मभिः कोटिकंदर्पलीलाभंको
टिचंद्रसमप्रभं अमूल्यरत्नरचितचारुभूषणभूषितं सेव्यंब्रह्मादिदेवैश्चसेवकैःसततंस्तुतं तद्रूपयाचप्रछ
न्नैर्वेष्टितंचसुरर्षिभिः वासयामासतंतेचरत्नसिंहासनेवरे तंतेप्रणेमुःशिरसाब्रह्माविष्णुशिवादयः संपुटां
जलयःसर्वेपुलकांकाश्रुलोचनाः सस्मितास्तान्यपृच्छत्सर्वंमधुरयागिरा प्रबोधितास्त्वबोधस्तःप्रवक्तुमुपचक्र
मे नारायणउवाच सहबुध्याबुद्धिमंतोनवक्तुमुचितंसुराः सर्वज्ञात्मानयाविश्वंशक्तिमंतोद्विजाविनाः ब्र
ह्मादिस्तंबपर्य्यंतंसर्वंप्रकृतिकंजगत् सत्यंसत्यंविनामांचमयाशक्तिःप्रकाशिता आविर्भूताचसामत्तः
सष्टादेवीमदीछया तिरोहितासाशेषेणचसृष्टीसंहरणेमयि सृष्टीकर्त्रींचप्रकृतिःसर्वेषांजननीपरा म

मत्तुल्या च मन्मायातिनारायणी स्मृता । सुचारं तपसा तसंशां तु नाध्यायता च मां । तेन तस्मै मया दत्ता तप
सां फलरूपिणी । व्रतं च लोकसिद्धार्थं मस्यानस्यार्थमेव च । स्वयं व्रतानां तपसां फलदात्री जगत्त्रये । माय
या मोहिताः सर्वे किमस्या वा स्तवं व्रतं । साध्यमस्या व्रतफलं कल्पे कल्पे पुनः पुनः । सुरेश्वरा मदंशाश्च ब्रह्म
विष्णुमहेश्वराः । कलाः कलांशांशु याः सा जाविनश्च सुरादयः । मदा विना घटं कर्तुं कुलालश्च यथाक्षम । वि
ना स्वर्णं स्वर्णकारः कुंडलं कर्तुमक्षमः । विना शक्त्या तथाहं च स्वसृष्टिं कर्तुमक्षमः । सृष्टिप्रधाना सृष्टि
श्च सर्वदर्शनसम्मतां । अहमात्मा हि निर्लिप्तो हृश्यः साक्षी च देहिनां । देहा प्राकृतिकाः सर्वे नश्वराः पांच
भौतिकाः । अहं नित्यशरीरी च पांचभौतुदिग्रहविग्रहः । सर्वाधारा च प्रकृतिः सर्वात्माहं जगत्सु च । अभि ॥१९॥
तात्मा मनो ब्रह्मा ज्ञानरूपो महेश्वरः । पंच प्राणाः स्वयं विष्णुः बुद्धिः प्रकृतिरीश्वरी । शक्तिनिद्रादयश्चै
ताः सर्वश्च प्रकृतेः कलाः । सा च शैलेंद्रकन्येयमिति वेदनिरूपितं । अहं गोलोकनाथाश्च वैकुंठे वास

सनातनः । गोपीगोपैः परिवृतस्तत्रैव द्विभुजः स्वयं । चतुर्भुजो त्रिदिवेशः लक्ष्मीशः पार्षदैर्वृतः । ऊर्द्ध्वं पर
श्च वैकुंठात्पंचाशत्कोटियोजनैः । ममाश्रमश्च गोलोको यत्राहं गोपिकापतिः । व्रताराध्यो हि द्विभुजः स
च तत्फलदायकः । यज्ञरूपं चितयेद्योहितं च तत्फलदायकः । व्रतं पूर्णं कुरु शिवे दश शिवं दत्वा च दक्षिणां ।
पुनः समुचितं मूल्यं दत्वा नाथं ग्रहीष्यसि । विष्णुदेहा यथा गावो विष्णुदेहस्तथा शिव । द्विजाय दत्वा गोमूल्यं
गृहाण स्वामिनं सति । यज्ञपत्नी यथादातुं समस्तास्मदैवहि । तथा सा स्वामिनं दातुं मीश्वरेति श्रुतेर्मतं ।
इत्युक्त्वा सस्तमध्ये तत्रैवांतरधीयत । प्रहृष्टा सा च संतुष्टा दक्षिणां दातुमुद्यता । कृत्वा शिवा पूर्णहोमं
सा शिवं दक्षिणां ददौ । स्वस्तित्युक्त्वा च जग्राह कुमारो देवसंसदि । उवाच दुर्गा संतुष्टा त्रस्ताशुष्ककंठोष्ठतालु
काः पुटांजलिपुटा विप्रं हृदयेन विदूयता । पार्वत्युवाच । गोमूल्यं मन्यते सममतिर्वेदनिरूपितं । गवां ल
क्षं प्रयच्छामि देहि मत्स्वामिनं द्विज । नरस्यास्यामि विप्रेभ्यो दानानि विविधानि च । आत्महीनो हि देहः क किं क

र्म्मकर्त्तुमिश्वर । सनत्कुमारउवाच । गवांलक्षेणमेदेवाविप्रस्यकिंप्रयोजनं । ददातिमूल्यरत्नंवगवांप्र
त्यर्पणेनक । स्वस्यस्वस्यस्वयंकर्त्तास्मिर्वःसर्वेजगत्त्रये । कर्त्तुरेवेप्सितंकर्म्मनेवेत्किंवाप्रयैरेछया । दिगंब
रेपुनःकृत्वाक्तमयाभिजगत्त्रये । बालकानांबालिकानांसमुहंस्मितकारणं । इत्युक्त्वाब्रह्मणःपुत्रोग
हीत्वाशंकरंमुने । संनिधौवासयामासतेजस्वीदेवसंसदि । दृष्ट्वाशिवंगृह्णमाणंकुमारेणचपार्वती । स
मुघतातनुंत्यक्तुंशुष्ककंठोष्टतालुका । विचिंत्यमनसासाध्वीत्येवमेवदुरत्ययं । नदृष्टोभीष्टदेवश्चनचप्राप्तं
फलंवत । एतस्मिन्नंतरेदेवाःपार्वतीसहितास्तदा । मघोरदृष्टुराकारोकैलासांतेजसांपरं । कोटिसूर्यप्रभो ॥२०॥
ईचप्रज्वलंश्चदिशोदश । कैलासशैलंपुरतःसर्वदेवादिभिर्युतं । सर्वापूर्वतरूछन्नंविस्ताराणंमंडलास्तत्तं । द
ष्टातश्चभगवतस्तुष्टुवुःस्तेक्रमेणत्र । विष्णुरुवाच । ब्रह्मांडानिचसर्वाणियल्लोमविवरेषुच । सोयंतेषा
उत्त्रांशकेवसंयोमहान्विराट् । ब्रह्मोवाच । वेदायस्तुकंदष्टुंयत्यप्रत्तंद्रष्टुमीश्वर । स्तोतुंतद्दणेनुम
हंशक्तःकिंस्तोमितत्परं । महादेवउवाच । ज्ञानाधिष्ठातृदेवोहंस्तोमित्तानपरंचकिं । सर्वनिंत्वनामंयत्नत्त्वां
स्वेछामयंविभुं । धर्म्मउवाच । अदृश्यमवतारेषुयद्दृश्यंसर्वजंतुभिः । किंस्तोमितेजोरूपंतंनक्तानुग्रहविग्रहं
देवाऊवाच । केवयंतत्कालांशाश्चकिंवात्वांस्तोतुमीश्वराः । स्तोतुंनशक्ताचेदायंनशक्ताचसरस्वती
मुनयऊचुः । वेदानपठित्वाविद्वांसोवयंकिंवेदकारणं । स्तोतुंमीशानवांणीशात्वांचवाग्मिनयपरं । सरस्वत्यु
वाच । वागधिष्ठातृदेवीमांवदंतिवेदवादिनः । किंचिन्नशक्तात्वांस्तोतुंमहोवाहतनसःपरं । सावित्र्युवाच ।
वेदप्रसूरहंमानास्रष्ठातत्कास्त्वयापुरा । किंस्तौमिस्त्रीस्वभावेनसर्वकारणकारणं । लक्ष्मीरुवाच । त्वदंशा
विष्णुकांताहंजगत्पोषणकारिणी । किंस्तौमित्वत्कलासृष्टाजगतांबीजकारणं । हिमालयउवाच । ह
संतिसंतोमांनाथकर्म्मणास्थावरंपरं । स्तोतुंसमुघतंतुछंकिंस्तौमिस्तोतुमत्तमः । क्रमेणसर्वेतंस्तुत्वा
देवाविररमुर्मुनेदेवाश्चमुनयःसर्वेपार्वतीस्तोतुंमुघता । धौतवस्त्रजटाभारंबिभ्रतीसुव्रताव्रते । प्रेरि

ता परमात्मानं व्रताराध्यं शिवेन च । ज्वलदग्निशिखारूपा तेजोमूर्त्तिमती सती । तपसां फलदा बाला ज
गन्नाथस्य कर्मणा । पार्वत्युवाच । कृष्ण त्वमात्मा सर्वेषां नज्ञाताहं त्वां ज्ञातुमीश्वरी । केवा जानंति वेदज्ञा वेदा वा
वेदकारका । त्वदंशास्त्वां न जानंति कथं ज्ञास्यंति त्वत्कला । त्वं चापि तत्त्वं जानासि किमन्ये ज्ञातुमीश्वराः । सूक्ष्मा
त्सूक्ष्मतमोऽव्यक्तः स्थूलात्स्थूलतमो महान् । विश्वस्त्वं विश्वजं स्त्वं विश्वबीजं सनातनः । कार्य्यं त्वं कारणं त्वं
च कारणानां च कारणं । तेजःस्वरूपो भगवान्निराकारो निराश्रयः । निर्लिप्तो निर्गुणः साक्षी स्वात्मारामः परा
त्परः । प्रकृतीशो विराड्बीजं विराट्रूपस्त्वमेव च । सगुणस्त्वं प्रकृतिकः कलया सृष्टिहेतवे । प्रकृति
स्त्वमात्मा त्वं च त्वदन्यो न कश्चिद्भवेत् । जीवस्त्वं साक्षिणो भोगी स्वात्मनः प्रतिबिंबकः । कर्म्म त्वं कर्म्मबीजं त्वं क
र्म्मणां फलदायकः । ध्यायंति योगिनस्तेजस्त्वदीयमशरीरिणः । वैष्णवाश्चैव साकारं कमनीयं मनोहरं । २१
केचिच्चतुर्भुजं शांतं लक्ष्मीकांतं मनोहरं । शंखचक्रगदापद्मधरं पीतांबरं परं । द्विभुजं कमनीयं च किशो

रं श्यामसुंदरं । शांतं गोपांगनाकांतं रत्नभूषणभूषितं । एवं तेजस्विनं भक्ताः सेवंते सततं मुदा । ध्यायंते
योगिनो यत्तत्कुतस्तेजस्विनं विना । तत्तेजो बिभ्रतां देव देवानां तेजसां पुरा । आविर्भूतासुराणां च वधाय ब्र
ह्मणः स्तुता । नित्या तेजःस्वरूपाहं विधृत्य विग्रहं विभो । स्त्रीरूपं कमनीयं च विधाय समुपस्थिता । मायया
त्तव संमोह्य मोहयित्वासुरान् पुरा । निहत्य सर्वान् शैलेंद्रमगमं तं हिमालयं । तातोऽहं संस्तुता देवैस्तारका
ह्रेण पीडितैः । अभवं दक्षजायायां शिवस्त्री पूर्वजन्मनि । त्यक्त्वा देहं दक्षयज्ञे शिवाहं शिवनिंदया । अभवं
शैलजायायां शैलजा च स्वकर्मणा । अनेकतपसा प्राप्तः शिवश्चात्रापि जन्मनि । पाणिं जग्राह मे योगी
प्रार्थितो ब्रह्मणा विभुः । शृंगारजं च तत्तेजो नालभं देवमायया । सोऽमिताभेव तनेत्रा पुत्रदुःखेन दुःखिता ।
व्रतेन वर्द्धितं पुत्रं लब्धुमिच्छामि सांप्रतं । देवेशाविहिता वेदे सांगे सस्याभिदक्षिणा । श्रुत्वा सर्वं कृपासिंधो कृ
पां मां कर्त्तुमर्हसि । इत्युक्त्वा पार्वती तत्र विरराम च नारद । भारते पार्वतीस्तोत्रं यः शृणोति सुसंयतः ।

सत्पुत्रं लभते नूनं विष्णुतुल्यपराक्रमं । संवत्सरं हविष्याशी हरिमभ्यर्च्य यत्नतः । स पुण्यकव्रतफलं
लभते नात्र संशयः । कृष्णस्तोत्रमिदं ब्रह्मन् सर्वसंपद्विवर्द्धनं । सुखदं मोक्षदं सारं स्वामिसौभाग्यवर्द्धनं ॥
सर्वसौंदर्य्यबीजं च यशोराशिविवर्द्धनं । हरिभक्तिप्रदं तत्वज्ञानबुद्धिविवर्द्धनं ॥ इति श्रीब्रह्मवैवर्त्ते महापुरा
णे नारायणनारदसंवादे गणपतिखंडे पुण्यके पार्वतीकृतं कृष्णस्तोत्रं नाम सप्तमोध्यायः ॥ ॥ नाराय
ण उवाच ॥ पार्वतीस्तवनं कृत्वा श्रीकृष्णः करुणानिधिः । स्वरूपं दर्शयामास सर्वादृश्यं सुदुर्लभं ॥ सुत्वादे
वि ध्यानलग्ना कृष्णैकमानमानसा । ददर्श निजसांमध्ये रूपं संसारमोहनं ॥ सद्रत्नसारनिर्म्माणहारकेणप
रिष्कृते । युक्तं माणिक्यमालाभी रत्नपूर्णमनोरणे । वह्निसंशुद्धपीतांशुधरं वंशीकरं परं । वनमालागलं
श्यामं रत्नभूषणभूषितं । किशोरवयसं वेशविचित्रं चंदनोक्षितं । चारुस्मितास्यमाश्रंतं सारदेंदुविनिंद ॥२३॥
कं । मालतीमाल्यसंयुक्तं मयूरपुच्छचूडकं । गोपांगनापरिवृतं राधावक्षस्थलोज्वलं । कोटिकंदर्पलावण्य

लीलाधाममनोहरं । अतीवहृष्टं सर्वेष्टं भक्तानुग्रहकातरं । दृष्ट्वा रूपं रूपवती पुत्रं तदनुरूपकं । मनसाव
रयामास वरं संप्राप्य तत्क्षणं । वरं दत्वा वरेशश्च स तयान्मनसि वांछितं । हत्वाभीष्टं सुरेभ्यश्च तत्रैवांतरधी
यत । कुमारं बोधयित्वा तु देवादेवे दिगंबरे । दुंदुभिस्तपमं तत्र प्रहृष्टायै कृपाविता । ब्राह्मणेभ्यो ददौ दुर्गा रि
त्नानि विविधानि च । सुवर्णानि च भिक्षुभ्यो वंदिभ्यो विश्ववंदिता । ब्राह्मणान् भोजयामास देवाश्च पर्वतांस्त
था । शंकरं पूजयामास चोपहारैरनुत्तमैः । दुंदुभिं वादयामास कारयामास मंगलं । गीतं गापयामास
हरिसंबंधसुंदरं । व्रतं समाप्य सा दुर्गा दत्वा दानानि संस्मिता । सर्वांश्च भोजयित्वा तु बुभुजे स्वामिना सह तां
बूलं च वरं रम्यं कर्पूरादिसुवासितं । कृमात्प्रदाय सर्वेभ्यो बुभुजे तेन कौतुकात् । पयःफेननिभां सय्यां र
म्यां सद्रत्ननिर्म्मितां । पुष्पचंदनसंयुक्तां कस्तूरीकुंकुमान्वितां । रहसि स्वामिना सार्द्धं सुष्वाप परमे
श्वरी । कैलासस्यैकदेशे च रम्ये चंदनकानने । सुगंधिकुसुमोत्केन वायुना सुरभीकृते । भ्रमरध्वनिसंसु

के पुंश्चीभक्षो किलरूतश्रुते विजहारसुरसिकातत्रतेनमहाम्बिका एतस्मिन्नकालेचसविष्णुर्विष्णु
मायया विहायविप्ररूपंतदाजगामरतेगृहं वृद्धंखमस्तंविनातैलंकुचेलंभील्लुकंमुने आलोक्यक
दर्शनंतृष्णयापरिपीडितं अतीवक्षुधागात्रंचविचित्रतिलकमुज्वलं बुद्धकाकुस्वरंदीनंदैन्याकुलितमूर्त्ति
मत् आजुहावमहादेवमतिवृद्धोत्तयाचकः दंडावलंबनंकृत्वारातिद्वारेतिदुर्द्धर्मैर्वलिः ब्राह्मणउवाच
किंकरोमिमहादेवरक्षमांशरणागतं सप्तएतित्रिव्रतेतेतपारणाकांक्षिणंक्षुधा किंकरोमिमहादेवहेता
तकरुणानिधे पश्यवृद्धंजराग्रस्तंतृष्णयापरिपीडितं मातरुत्तिष्ठमामन्नंप्रयच्छवासितंजलं अनंतर
लोऽहंवजेरक्षमांशरणागतं मातर्मातर्जगन्मातर्मेहिताहंजगद्गुरुः आजगामरमतिद्वारं पार्वत्यासह
शंकरः ददर्शब्राह्मणंदीनंजरयापरिपीडितं वृद्धंखुलितगात्रंचविचित्रमंदंडमानतं तपस्वीनमशांते २३
चक्षुष्कंशोष्टतालुकं कुर्वंतंपरयाभक्त्याप्रणामंस्तवनंतयोः श्रुत्वातद्वचनंतत्रनीलकंठःसुधातम

उवाचपरयाप्रीत्याप्रसन्नःसंप्रहस्यच शंकरउवाच अहंतेकुत्रविप्रर्षेवदवेदविदांवर किन्नामभवतः
त्रिप्रंज्ञातुमिच्छामिसांप्रतं पार्वत्युवाच आगतोसिकुतोविप्रममभाग्यादुपस्थितं अद्यमेसफलंजन्मब्रा
ह्मणोमद्गृहेस्थितोतिथिः अतिथिपूजितोतेनत्रिजगत्तेनपूजितं तत्रैवाधिष्ठितादेवाब्राह्मणागुरवोद्वि
जः तीर्थान्यतीथिपादेषुशाश्वत्तिष्ठंतिनिश्चितं तत्पादधौततोयेनमिश्रिताःतानिलभेद्ध्रुवं सस्नातंसर्वतीर्थेषु
सर्वयज्ञेषुदीक्षितः अतिथिपूजितोयेनसात्मशक्त्यायथोचितं महादानानिसर्वाणिकृतानितेनभूतले अ
तिथिपूजीतोयेननारतेभक्तिपूर्वकं नानाप्रकारपुण्यानिवेदोक्तानिचयानिच तान्येवातिथिसेवायाःक
लांनार्हंतिषोडशीं अपूजितोतिथिर्यस्यभवनाद्विनिवर्त्तते पितृदेवाग्नयःपश्चाद्गुरवोयांत्यपूजिता यानि
कानिचपापानिब्रह्महत्याकृतानिच तानिसर्वाणिलभतेतान्यर्च्यातिथिपूजितं ब्राह्मणउवाच जानासि
वेदान्वेदज्ञेवेदोक्तंकुरुपूजनं क्षुरैतत्तृष्णयांपीडितोमातर्दर्शनंचतेनःश्रुतोश्रुतं व्याधियुक्तोनिराहारो

यदा वा न शान व्रती । मनोरथेनोपहारं भोक्तुमिच्छति मानवः । पार्वत्युवाच । भोक्तुमिच्छसि किं विप्र त्रैलो
क्येऽप्यसुदुर्लभं । भोक्तुमिच्छसि मे साहाय्य जन्म सफलं कुरु । ब्राह्मण उवाच । व्रतेनस्तु व्रतया सर्वमुपहारं स
मातृतं । नानाविधं मिष्टमिष्टं भोक्तुं श्रुत्वा समागतः । सुव्रतेन च पुत्रोऽहं मया मां पूजयिष्यसि । दत्वा मिष्टानि व
स्त्राणि त्रैलोक्येऽदुर्लभानि च । ताश्च ताः पंचविधाः प्रोक्ता मातरो विविधाः स्मृताः । पुत्रः पंचविधः साध्वी कथितो वे
दवादिभिः । विद्यादाताऽन्नदाता च भयात्त्राता च जन्मदः । कन्यादाता च वेदोक्ता नराणां पितरः स्मृताः । गुरुपत्नी
गर्भदा धात्री स्तनदा तत्र दात्री पितुः सुस्मृताः । स्वसुर्मातुः सपत्नी च पुत्रभार्यान्नदायिका । भृत्यः शिष्यश्च पुत्र
श्च योऽप्यश्च शरणागतः । धर्मपुत्राश्च चत्वारो वीर्यजो धनभागिति । त्वं तदस्योऽपि इति मातर्हे द्वाहं शर २४
णागतः । सांप्रतं त्वं च वंध्याया अनाथ पुत्र एव च । पिष्टकं परमान्नं च सुपक्वानि फलानि च । नानाविधानि
मिष्टानि कालदेशोद्भवानि च । पक्वान्नं स्वस्तिकं हारं इक्षुमिक्षुविकारकं । घृतं दधि च शाल्यन्नं घृतपक्वं च

व्यंजनं । लड्डुकानि तिलानां च मिष्टान्नं सगुडानि च । असंख्यातानि वस्तूनि सुधायाः सर्वमीश्वरं । ताम्बूलं च व
रं रम्यं कर्पूरादिसुवासितं । जलं सुनिर्मलं स्वादु द्रव्याणि एतानि वासितं । द्रव्याणि यानि नक्तामे चारु तं
बोदरं भवेत् । अनंतरत्नोद्भवजे तानि मत्यं प्रदास्यसि । स्वामी त्वं त्रिजगत्कर्ता प्रदाता सर्वसंपदां । महा
लक्ष्मीस्वरूपा त्वं सर्वैश्वर्यप्रदायिनी । रत्नसिंहासनं वस्तु ममत्यर रत्नभूषणं । वह्निशुद्धांशुकं चारु प्रदा
स्यसि सुदुर्लभं । सुदुर्लभं हरेर्मंत्रं हरौ भक्तिर्दृढा सति । हरिप्रिया हरेः शक्तिः त्वमेव सर्वदा सदा । ज्ञानं
मृत्युंजयं नाम दातृ शक्तिं सुखप्रदां । सर्वसिद्धिं च किं मातुरेदेषां स्वसुताय च । मनः सुनिर्मलं कृत्वा धर्मे तप
सि संततं । करिष्यसि सर्वपरे न कामे जन्महेतुके । स्वकामात्फलं कर्मकर्मणो भोग एव च । भोगो शुभा
शुभो ज्ञेयो हेतु सुखदुःखयोः । दुःखं न कस्माद्भवति सुखं वा जगदंबिके । सर्वः स्वकर्मणो भोगस्तेन रतन्द्विरतो
बुधः । कर्मनिर्मूलनं त्येव संतो हि सततं सदा । हरिभावनसुबुध्या तत्तपसा सत्संगतः । इंद्रियद्भ्यसंयो

गसुखविध्वंसनावधि। हरिभक्तापरूपंचसुखंतत्सार्वकालिकं। हरिस्मरणशीलानांनायुर्यातिसतांस
ति। नतेषामीश्वरःकालोनचमृत्युर्जयोध्रुवं। शिवंजानंतियेभक्तानारतेचिरजीविनः। सर्वसिद्धंचविज्ञा
यस्वच्छंदंसर्वगामिनः। जातिस्मराहरेर्भक्ताजानंतिकोटिजन्मनः। कथयंतिकथांजन्मलक्षंतेस्वेच्छयामहा
परंपुनंतिलिप्तलास्तीर्थानिस्वावलीलया। पुण्यक्षेत्रेसेवायैपरार्थंचभ्रमंतिते। वैस्नवानांपदस्पर्शात्सद्य
ःपूतावसुंधरा। भक्तरोहमात्रंचतीर्थंयत्रवसंतिते। गुरोराश्रणाद्विष्णुमंत्रःश्रुतोयस्यभविष्यति। तंवैसर्वं
तीर्थपूतंप्रवदंतिपुराविदः। पुराणानांशतंपूर्वमुध्दरंतिशतंपरं। लीलयानारतेभक्तासोदरान्भ्रातरंत
था। मातामहान्पुरुषान्दशपुत्रान्परान्दश। मातुःप्रसमुद्धरंतिदासरूपेणाघमताडनात्। भक्तदर्शन ।२५।
मात्रेणमानवान्प्राप्नुवंतियेनरव्यालाःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षिताः। नलिप्ताःपातकेभक्ताःसततंह
रिमानसाः। यथाग्निंधःसर्ववस्तु यथाद्रव्येषुवायवः। त्रिकोटिजन्मनाजंतुःप्राप्नोतिजन्ममानवं। प्राप्ने

तिसंगसमानुषेकोटिजन्मनः। भक्तसंगात्नवेद्र्वेकोरंकुरोजीविनःसति। अतिभक्तादर्शनादेवसच
प्राप्नोतिसुभक्ततां। पुनःप्रफुल्लतांयांतिवैष्णवालापमात्रतः। अंकुरस्याविनाशीचवर्द्धतेप्रतिजन्मनि। न
तरोवर्द्धमानस्यहरिदास्यफलंसति। परिणामेनभक्तानाकेपार्षदस्वनवेद्धरेः। सतिप्रलयनाशेननकेत
स्यनिश्चितं। सर्वस्रष्टस्वसंहारेब्रह्मलोकस्यब्रह्मणः। तस्मान्नारायणेभक्तिर्देहिनारायणांबिके। नमेव
विष्णुभक्तिस्वविष्णुमाये। त्वयाविना। नदत्तंलोकमिष्टार्थंतत्जपस्तवपूजनं। सर्वेषांफलदात्रीत्वंनित्यरू
पासनातनी। गणेश्वपूर्पःश्रीकृष्णःकल्पेकल्पेतवात्मजः। त्वत्क्रोडमागतःक्षिप्रमित्युक्त्वांतरधीयतः
कृत्वांतर्धानमीशश्चबालरूपंविधायतः। जगामपार्वतीतल्पंमंदिराभ्यंतरस्थितं। तल्पस्थोशिववीर्यंच
मिश्रितःसबभूवह। ददर्शगेहशिखरंप्रसूताबालकोयथा। शुद्धचंपकवर्णाभःकोटिचंद्रसमप्रभः
सुखदृश्यःसर्वजनैश्चक्षुरश्मिविवर्द्धकः। अतीवसुंदरतनुःकामदेवविमोहनः। मुखंनिरूपमंबिभ्र

त् शारदेंदुविनिंदितं सुंदरे लोचने बिभ्रत्स्वारूपग्र्यविनिंदके ओष्ठाधरपुटं बिभ्रत्पक्वबिंबनिनिंदकं
कपालं च कपोलं च भाति वसुमनोहरं नासाग्रं रुचिरं बिभ्रत् खगेंद्रचंचुनिंदकं त्रैलोक्येषु निरुपमं सर्वा
गं बिभ्रदुत्तमं शयानः शयने रम्ये प्रेरयन् हस्तपादकं ॥ ॥ इति श्रीब्रह्मवैवर्त्ते महापुराणे नारायणनार
दसंवादे गणपतिखंडे गणेशोत्पत्तिर्नामाष्टमोध्यायः ॥ ॥ नारायण उवाच हरौ तिरोहिते तत्र दुर्गा च शं
करस्तथा ब्राह्मणान्वेषणं कृत्वा बभ्राम घरितो मुने पार्वत्युवाच अपि विप्र त्वमतिवृद्धः क्व गतोसि क्षुधा
तुरः हे नाथ तद्दर्शनं देहि प्राणांस्त्वं रक्ष मे हिते शिव शीघ्रं समुत्तिष्ठ तस्य वा जीवनं तथा पितरस्तन्न गृह्णंति
पिंडदानं च तर्पणं तस्माद्गृह्णंति वह्निपुष्पजलं सुरा हव्यपुष्पजलं दिव्यमस्तु वेश्म सुरासमं अ
मेध्यसदृशाः पिंडः स्वर्णं च पुष्पनाशनं एतस्मिन्नंतरे तत्र वाग्बभूवाशरीरिणी कैवल्ययुक्तां मां दुर्गां २६
तां स्तुत्वा वसुरातुराः शांत नगवृजगन्मातः स्वसुतं पश्य मंदिरे कृष्णं गोलोकनाथं तं परिपूर्णतमं

परं सुपुण्यकव्रततरोः फलरूपं सनातनं मंत्रेजो योगिनः शश्वद्ध्यायंते संततं मुदा ध्यायंते वैष्णवा
देव्या ब्रह्मविष्णुशिवादयः यस्य पूज्यस्य सर्वाग्रे कल्पे कल्पे च पूजनं यस्य स्मरणमात्रेण सर्वविघ्नविन
श्यति पुण्यराशिस्वरूपं च स्वसुतं पश्य मंदिरे कल्पे कल्पे ध्यायसे यं ज्योतिरूपं सनातनं तं पश्य नंद
पुत्रं भक्तानुग्रहविग्रहं तव वांछापूर्णबीजं तपःकल्पतरोः फलं सुंदरं स्वसुतं पश्य कोटिकंदर्पनिंदकं ना
यं विप्रः क्षुधार्त्तश्च विप्ररूपी जनार्दनः कृत्वाविलंपर्वतं दुर्गे ज्वरावृद्धः कृचातिथि सरस्वतीत्येवमुक्त्वा विरराम
च नारद त्रस्ता श्रुत्वाकाशवाणीं जगाम स्वालयं सती ददर्श बालं पर्यंके शयानं सस्मितं मुदा पश्यंती
गेहशिखरं शरच्चंद्रसमप्रभं स्वप्रभया पादलेनैव द्योतयंतं महीतलं कुर्वंतं त्वत्र मंतल्पे पश्यंतं स्वेच्छया
मुदा उमेति शब्दं कुर्वंतं रुदंतं तं स्तनार्थिनं दृष्ट्वा तदद्भुतं रूपं रुक्षां शंकर संनिधिं गत्वेत्युवाच प्राणेश
मंगलं सर्वमंगला पार्वत्युवाच गृहमागच्छ प्राणेश तपसां फलदायकं कल्पे कल्पे ध्यायसे यं

तंपश्चादागत्यमंदिरं शीघ्रंपुत्रमुखंपश्यपुण्यबीजंमहोत्सवं पुन्नामनरकत्राणकारणंभवतारणं
स्नानंचसर्वतीर्थेषुसर्वयज्ञेषुदक्षिणं पुत्रास्यदर्शनस्यास्यकलांनार्हंतिषोडशीं सर्वदानेनयत्पुण्यं
यत्पृथिव्याःप्रदक्षिणात् पुत्रदर्शनपुण्यस्यकलांनार्हंतिषोडशीं सर्वेस्तपोभिर्यत्पुण्यंयद्देवानर्चनेर्व
लैः सत्पुत्रोद्भवपुण्यस्यकलांनार्हंतिषोडशीं यद्विप्रभोजनैःपुण्यंयद्देवसुरसेवनैः सत्पुत्रेप्राप्तिपु
ण्यस्यकलांनार्हंतिषोडशीं पार्वतीवचनंश्रुत्वाशिवःप्रहृष्टमानसः आजगामस्वभवनंहिप्रसंक्रांत
यासह ददर्शतल्पेस्वसुतंतप्तकांचनसंनिभं हृदयस्थंचयद्रूपंतदेवातिमनोहरं दुर्गातल्पात्समादाय
कृत्वावक्षसितंसुतं चुचुंबानंदजलधौनिमग्नासत्युवाचह पार्वत्युवाच संप्राप्यमूलरत्नंतुपूर्वंमे
वसनात्मजं यथामनोदरिद्रस्यसहसाप्राप्यसद्धनं कांतेसुचिरमायातेप्रोषितेपोषितोयथा मानसं ॥२७॥
परिपूर्णंचेहंतलब्ध्वेवचयथामम सुवारंगतमायातमेकपुत्रायथासुतं दृष्ट्वातुशापयावत्सलयाह

मपिसांप्रतं सत्वद्दत्तंसुवीरंवाश्रेष्ठंप्राप्यहृष्टोयथार्पितजन अनावृष्टौसुवृष्टिंचसंप्राप्याह्लतयासुत यु
थासुचिरमंधानांभिक्षितानांचनिराश्रये चक्षुःसुनिर्मलंप्राप्यमनःपूर्णंतथामम सुचिरंक्षुधितानांचकृतो
पवासकारिणां सदन्नेरंतोदृष्टामनःपूर्णंतथामम कृत्स्नयाश्रुष्ककंगानांसुचारंचसुशीलजं सुवा
सिंजलंप्राप्यमनःपूर्णंतथामम इत्युक्त्वापार्वतीतत्रक्रोडेकृत्वास्वबालकं प्रीत्यास्तनंददौतस्मैपरमानंद
मानसा क्रोडेचकारभगवान्बालकंहृष्टमानसः चुचुंबगंडेवेदोक्तंपुपुजेचाशिषंमुदा इतिश्रीब्र
ह्मवैवर्त्तेमहापुराणेनारायणनारदसंवादेगणपतिखंडेगणेशादर्शनंनामनवोध्यायः नारायण
उवाच तोरणप्रतिविहिर्गत्वापुत्रमंगलहेतवे विविधानिचरत्नानिब्राह्मणेभ्योददौमुदा बंदिभ्योभिक्षु
केभ्यश्चदानानिविविधानिच नानाविधानिवाद्यानिवादयामासशंकरः हिमालयश्चरत्नानांददौलक्षं
द्विजातये सहस्रंचगजेंद्राणांमश्वानांचत्रिलक्षकं दशलक्षंगवांचैवपंचलक्षंसुवर्णकं मुक्तामाणि

कयरत्नानि मणिश्रेष्ठानि यानि च । अन्यान्यपि च दानानि विप्राणां वांछितानि च । सुदुर्लभानि स्वर्गेच ब्रा
ह्मणेभ्यो ददौ मुदा । धर्मश्च सूर्यश्च शक्रश्च देवाश्च मुनयस्तथा । गंधर्वाः पर्वता देव्यो ददुर्दर्शनं क्रमेण च । ताप
सानां सहस्राणि रुचकानां शतानि च । शतं च कौस्तुभानां च हरिकानां शतानि च । माणिक्यानां सहस्राणि
रत्नानां च शतानि च । शतानि गंधसाराणां मणींद्राणां च नारद । शतानि चंद्रकांतानां विरजानां शतानि
च । हरिद्वर्णमणींद्राणां सहस्राणि मुदान्वितः । गवां रत्नानि लक्षाणि गजरत्नं सहस्रकं । अमूल्यान्य
श्वरत्नानि श्वेतवर्णानि कौतुकात् । शतलक्षं सुवर्णानां वह्निशुद्धांशुकानि च । ब्राह्मणेभ्यो ददौ ब्रह्म हंसस्त
क्षीरोदकार्णवः । हारं चामूल्यरत्नानां त्रिषु लोकेषु दुर्लभं । अतीव निर्मलं सारं सूर्यभानुविनिंदकं । परि
ष्कृतं व्यपाणि कैश्चहारकेन विराजितं । रम्यं कौस्तुभमध्यं च ददौ देवी सरस्वती । त्रैलोक्यसारहारं च सद्र ॥२९॥
त्नसारनिर्मितं । भूषणानि च सर्वाणि सा सावित्री ददौ मुदा । लक्ष्मं स्वर्णलोष्ठाणां धनानि विविधानि च

शतान्यमूल्यरत्नानि कुबेरश्च ददौ मुदा । दानानि दत्वा विप्रेभ्यो ह्यन्ये सर्वे ददुः शिवं । परमानंदसंयुक्ताः शि
वपुत्रोत्सवे मुने । भारं वोढुमशक्ताश्च ब्राह्मणा वंदिनस्तथा । स्थापं स्थापं च गच्छंतो धनानां पथि कातराः ।
कथयंति कथाः सर्वे विश्रांताः पूर्वदायिनां । वृद्धाश्च एवं ति मुदितं युवानो नित्तुका मुने । विष्णुः प्रमुदितस्त
त्र वादयामास दुंदुभिं । संगीतं कारयामास कारयामास नर्त्तनं । वेदांश्च पाठयामास पुराणानि च नारद
तार मुनींद्रान्नानयामास पूजयामास संमुदा । आशीषं दापयामास कारयामास मंगलं । साईदिवैश्च देवी
भिर्दत्तं तस्मै शुभाशिषं । विष्णुरुवाच । शिवेन तुल्यं ज्ञानं ते परमायुश्च बालक । पराक्रमो मया तुल्यः
सर्वसिद्धीश्वरो भव । ब्रह्मोवाच । यशसा जगत्पूर्णं सर्वपूज्यो भवाचिरं । सर्वेषां पुरतः पूजा भवतु ति
सुदुर्लभा । धर्म उवाच । मया तुल्यश्च धर्मिष्ठो भगवान् भव दुर्लभः । सर्वज्ञश्च दयायुक्तो हरिभक्तो ह
रिः समः । महादेव उवाच । दाता भव मया तुल्यो हरिभक्तश्च बुद्धिमान् । विद्यावान् पुण्यवान् शांतो

दंतश्च प्रांगणे वत्स च । लक्ष्मीरुवाच । मम स्थितिस्त्वद्गेहे च देहे भवतु शाश्वती । पतिव्रता मया तुल्या
शांता कांता मनोहरा । सरस्वत्युवाच । मया तुल्या सुकविता धारणा शक्तिरेव च । स्मृतिर्बुद्धिर्विवेचना शक्ति
र्भवत्वतिशया सुत । सावित्र्युवाच । ब्रह्माहं वेदजननी वेदज्ञाता भवाचिरं । मन्मंत्रजपशीलश्च प्रव
रो वेदवादिनां । हिमालय उवाच । श्रीकृष्णे ते मतिः शश्वद्भक्तिर्भवतु शाश्वती । श्रीकृष्णतुल्यो भगवा
न्भव कृष्णपरायणः । मेनकोवाच । समुद्रतुल्यो गांभीर्ये कामतुल्यश्च रूपवान् । श्रीयुक्तः श्रीप
तिसमो धर्मे धर्मसमो भव । वसुंधरोवाच । क्षमाशीलो मया तुल्यः शरण्यः सर्वरत्नवान् । निर्विघ्नो
विघ्ननिघ्नश्च भव वत्स शुभाश्रयः । पार्वत्युवाच । तातत्तुल्यो महायोगी सिद्धः सिद्धिप्रदः शुभः । मृत्युंज
यश्च भगवान्भव तत्त्वविशारद । ऋषयो मुनयः सिद्धाः सर्वे सुयुजराशिषं । ब्राह्मणा विदनश्चैव पु ॥२८॥
मुनुः सर्वमंगलं । सर्वं ते कथितं वत्स सर्वमंगलमंगलं । गणेशजन्मकथनं सर्वविघ्नविनाशनं

नारायण उ.

इमं सुमंगलाध्यायं यः शृणोति सुसंयतः । सर्वमंगसंयुक्तः सं भवेन्मंगलालयः । अपुत्रो लभते पु
त्रमधनो लभते धनं । कृपणो लभते सत्वं शश्वत्संपत्करायि सेव । भार्यार्थी लभते भार्यां प्रजार्थी लभते प्रजाः ।
आरोग्यं लभते भोगी सौभाग्यं दुर्भगो लभेत् । नष्टपुत्रं नष्टधनं प्रोषितं च प्रियं लभेत् । शोकाविष्टः स
दानंदं लभते नात्र संशयः । गणेशाख्यानश्रवणे यत्फलं लभते नरः । तत्फलं लभते नूनमध्यायश्रव
णे मुने । अयं च मंगलाध्यायो यस्य गेहे च तिष्ठति । सदा मंगलसंयुक्ता सं भवेन्नात्र संशयः । यात्राका
ले च पुण्याहे यः शृणोति समाहितः । सर्वाभिष्टं स लभते श्रीगणेशप्रसादतः । इति श्रीब्रह्मवैवर्ते म
हापुराणे नारायणनारदसंवादे गणपतिखंडे गणेशोद्भवमंगलं नाम दशमोऽध्यायः । नाराय
ण उवाच । हरिस्नामाभिषिंचस्त्वा रत्नसिंहासने वरे । देवैश्च मुनिभिः सार्द्धमुवाच तत्र संसदि । दक्षिणे
शंकरस्तस्य वामे ब्रह्मा प्रजापतिः । पुरतो जगतां साक्षाद्धर्मो धर्मवतां वरः । आवां धर्मसमीपे च सूर्य

शांककलानिधिः । देवाश्च मुनयो ब्रह्मन्नप्सुश्चैलास्सुखासने । नर्तनं नर्तकश्रेणीर्जगुर्गंधर्वकिंनराः
श्रुतिसाराः स्तुतिं सुखं तुष्टुवुः कृतयो हरिः । एतस्मिन्नंतरे तत्र द्रष्टुं शंकरनंदनं । आजगाम महायोगि
सूर्यपुत्रः शनैश्वरः । अत्यंतानम्रवदन ईषन्मुद्रितलोचनः । अंतर्बहिःस्मरन् कृष्णं कृष्णैकतानमान
सः तपःफलं फलाशी तेजस्वी ज्वलदग्निशिखोपमः । अतिसुंदरः श्यामः पीतांबरधरो वरः । प्रणम्य
विष्णुं ब्रह्माणं शिवं धर्मं रविं सुरान् मुनींद्रान् बालकं द्रष्टुं जगाम तदनुज्ञया । प्रधानद्वारमासाद्य शिव
तुल्यपराक्रमं द्वारिणं शूलहस्तं च विशालाक्षमुवाच ह । शनैश्वर उवाच । शिवाज्ञया शिशुं द्रष्टुं यामि
शंकरकिंकर । विष्णुप्रमुखदेवानां मुनीनामनुबोधतः । गंतुं देहि त्वया मामपि पार्वतीसन्निधिं बुध । पुन ॥ ३० ॥
र्यामि शिशुं दृष्ट्वा विषयासक्तमानसः । विशालाक्ष उवाच । अज्ञावहो न देवानां नाहं शंकरकिंकर । द्वा
घा रक्षो तु महारक्षोहं विनात्ममातुराज्ञया । ददौ कर्मग्रहे त्वाय चक्षुः कोपाज्ञया ततः । शनिरभ्यंतरं गत्वान्

नामानम्रकंधरः । रत्नसिंहासनस्थां च पार्वतीं सस्मितां मुदा । सखीभिः पंचभिः श्वेतैर्वितां श्वेतचामरैः
सखीदत्तं च ताम्बूलं भुक्तवंतीं सुवासितं । वन्हिशुद्धांशुकाधानां रत्नभूषणभूषितां । पश्यंतीं नर्तकीनृत्यं पुत्र
वक्षःस्थलस्थितां । ननाम सूर्यसुतं दृष्ट्वा दुर्गा शीघ्रमसत्वरं । शुभाशिषं ददौ तस्मै पप्रच्छ तत्कुशलं शुभं । पार्व
त्युवाच । कथमानम्रवक्त्रस्त्वं श्रोतुमिच्छामि सांप्रतं । कथं न पश्यसि मां साधो बालकं वा ग्रहेश्वर । शनिरुवाच । स
र्वे स्वकर्मणा साध्वि भुंजते तत्परं सं फलं । शुभाशुभं वा यत्कर्म कोटिकल्पैर्न लुप्यते । कर्मणा जायते जंतुर
ब्रह्मेंद्रसूर्यमंदिरे । कर्मणा नरगेहेषु पश्वादिषु च कर्मणा । कर्मणा नरकं यांति वैकुंठं यांति कर्मणा
स्वकर्मणा च राजेंद्रो भृत्यस्तस्य स्वकर्मणा । कर्मणा सत्कुटुंबी च कर्मणा बंधुकंटकः । सभार्यकः सुपु
त्री च सुखी शश्वत्स्वकर्मणा । अपुत्रकश्च कुस्त्रीवान्स्त्रीकश्च स्वकर्मणा । इतिहासं चातिगोप्यं शृणु
शंकरवल्लभे । अकथ्यं जननीसाक्षात् लज्जाजननकारणं । आबाल्यात्कृष्णभक्तोहं कृष्णध्यानैकमानसः

तपस्यासुरतः शश्वद्विषयेविरतसदा । पितादहौविवाहेनकन्यांचित्ररथस्यच । सतीतेजस्विनीशश्व
तपस्यासुरतासती । एकदासाऋतुस्नातासुवेशंस्वंमिविधायच । रत्नालंकारसंयुक्तामुनिमानसमो
हिनी । हरिपादंध्यायमानंसायोगेपश्येत्सुवाचह । मत्समीपंसमागत्यःसस्मितानननलोचना । शापमामप
श्यंतमृतुनशास्वकोपत । बाह्यज्ञानविहीनंचध्यानैकतानमानसं । नदृष्टाहंत्वयायेननकृतमृतुरक्षणं । त्व
याहृष्टंचत्वद्वस्तुंमूढसर्वंविनश्यति । अहंचवारितेध्यानेतस्मातोषंप्रगामता । शापंमोक्तुंनशक्तासापश्चा
तापंचकारहा । तेनमातर्नपश्यामिकिंचिद्वस्तुस्वचक्षुषा । ततःप्रभृतिनम्रास्यःप्राणिहिंसाभयादहं । शा
नैश्चरवचःश्रुत्वाजहासपार्वतीमुने उच्चैःप्रजहसुःसर्वानर्त्तक्यःकिंकरीगणाः ॥ इतिब्रह्मवैव २१
र्तेमहापुराणेनारायणनारदसंवादेगणपतिखंडेशनीपार्वतीसंवादोनामैकादशोध्यायः ॥ ॥
श्रीनारायणउवाच । दुर्गातद्वचनंश्रुत्वासस्मारहरिमीश्वरं । ईश्वरेच्छावशीभूतंजगामदेव

के
स्युवाच । साचदेवीवशीभूताशनिंप्रोवाचकौतुकात् । पश्यमांत्वमतःशीघ्रमितिनिषेकेनवार्यते । पार्व
तीवचनंश्रुत्वासोनुमेनेहृदास्वयं । पश्यामिकिंनपश्यामिकिंनपश्यामिपार्वतीसुतमित्यहो । यदिबालो
मयादृष्टस्तस्यविघ्नोनवेध्रुवं । अन्यथामेसुप्रशस्तंपरतःस्यात्परहरणं । इत्येवमुक्त्वाधर्मिष्ठोधर्मीकृत्वास्व
साक्षिणं । बालंद्रष्टुंमनश्चक्रेनबालमातरंशनैः । विषण्णमानसःपूर्वंशुष्ककंठोष्ठतालुकः । सव्यलोचनकोणे
नददर्शशिशोर्मुखं । शनिश्चदृष्टिमात्रेणचिच्छेदमस्तकंमुने । चक्षुर्निवारयामासतस्थौनम्राननःशनिः । प्र
लस्थौपार्वतीक्रोडेतत्सर्वांगःसलोहितः । विवेशमस्तकंकृष्णेगत्वागोलोकमीप्सितं । मुर्च्छांसंप्राप्यसादेवी
विलप्यचरुरोदमुहुः । मृताइवस्थियांतुकृत्वावक्षसिबालकं । विस्मितास्तेसुराःसर्वेचित्रपुत्तलिकायथा
देव्यश्चशैलागंधर्वाःशिवकैलाशवासिनः । तानसर्वान्मूर्छितान्दृष्ट्वागरुडेगरुडंहरिः । जगामपुष्पभ
द्रांसउत्तरस्यांदिशिस्थितां । पुष्पभद्रानदीतीरेददर्शकाननेस्थितं । गजेंद्रंनिद्रितंतत्रशायानंहस्तीनी

मी॰ श्रु॰ ४

सुप्तं दिक्षूत्तरस्यां शिरसं मूर्छितं सुरतश्रमात् परीतः शावकान्दृष्ट्वा परमानंदमाप्तवान् शीघ्रं
सुदर्शनेनैव चिच्छेद तच्छिरो मुदा स्थापयामास गंडे रुधिराक्तं मनोहरं गजच्छिन्नांगविच्छेदेन प्रबो
धं प्राप्य हरिः स बालकांस्तान्बोधयामास वाशुभं परतः सदा रुरोद शावकैः सार्द्धं सा वशाश्रुमुखातुरा उ
५ शावकैःकांतं सस्मितं मोक्षदं शंखचक्रगदापद्मधरं पीतांबरं परं गरुडस्थं जगत्कांतं श्याममयं तं स्तु
दर्शनं निषेकं खंडितं शक्रं निषेकजनकं विभुं निषेकभोगदातारं भोगनिस्तारकारणं प्रभुस्तत्त्व
ज्ञानुष्टस्तस्मै विप्रवरं ददौ मंत्रास्त्रं विनिष्कृष्य युयुजे तत्कृते मुदा जीवयामास तं तत्र ब्रह्मज्ञानेन ब्र
ह्मवित् सर्वांगे योजयामास गजस्य चरणांबुजं तं जीवा कल्पपर्यंतं परिवारैः समं गजः इत्युक्त्वा ३३
च मनोयोगी कैलासमाजगाम सः आगत्य पार्वतीस्थानं बोधयित्वा तु तं शिशुं बोधयामास तां नार
यणश्चाध्यात्मिकविबोधने विष्णुरुवाच ब्रह्मादिकीटपर्यंतं जगत्कुक्षे स्वकर्म्मणां फलं भुंक्ते स्वस्म

यासि त्वं न जानासि किं शिवे कल्पकोटिशतं भोगो जीविनां तत्स्वकर्मणां उपस्थितो भवेन्नित्यं प्रतियोनौ शु
भाशुभः इंद्रः स्वकर्मणा कीटयोनौ जन्म लभेत् स्फुटं कीटश्चापि भवेदिंद्रः पूर्वकर्मफलेन वै सिंहोपि मक्षि
कां हंतुमक्षमः प्राक्तनं विना मशको हस्तिनं हंतुं क्षमश्च प्राक्तनेन च सुखं दुःखं भयं शोकमानंदं कर्मणः फ
लं सुकर्म्मणः सुखं हर्षं इतरे पापकर्म्मणः इहैव कर्म्मणो भोगः परत्र च शुभाशुभं कर्मोपार्जनयोग्यं च
पुण्यक्षेत्रं च भारतं कर्म्मणां फलदाता च विधाता च विधेरपि मृत्योर्मृत्युः कालकालो निषेकस्य निषेककृत् संह
र्तुरपि संहर्त्ता पातुः पाता परात्परः गोलोकनाथः श्रीकृष्णः परिपूर्णतमः स्वयं वयं यस्य कलाः पुंसो ब्रह्मवि
ष्णुमहेश्वराः महान्विराट् यदंशश्च यल्लोमविवरे जगत् कलांशाः केपि तद्देवि कलांशांशाश्च केचन
चराचरं जगत्सर्वं तत्तस्तेन विनायकः श्रीविष्णोर्वचनं श्रुत्वा परितुष्टा च पार्वती स्तनं ददौ च शिशवे तं त्र
णम्य गदाधरं तुष्टाव पार्वती तुष्टा प्रेरिता शंकरेण च पुटांजलियुता नत्वा विष्णुं तं कमलापतिं आशिषं

पुपुजे विष्णुः शिशुं च शिशुमातरं । ददौ गले बालकस्य कौस्तुभं च स्वभूषणं । ब्रह्मा ददौ स्वमुकुटं धर्म्म(
श्च रत्नभूषणं । क्रमेण देव्यो रत्नानि दुदुः शिवं सर्वयथोचितं । तुष्टाव तं महादेवश्चान्ये च हृष्टमानसाः । देवा(
श्च मुनयः शैला गंधर्वाः सर्वयोषितः । दृष्ट्वा शिवशिवा चैव बालकं मृतजीवितं । ब्राह्मणेभ्यो ददौ तत्र कोटिर
त्नानि नारद । अश्वानां च गजानां च सहस्राणि शतानि च । वह्निस्ता प्रददौ तत्र बालके मृतजीविते । हिमा
लयश्च संहृष्टो हृष्टा देवाश्च तत्र वै । दुदुः शानि विप्रेभ्यो वंदिभ्यः सर्वयोषितः । ब्राह्मणान् भोजयामास कारया
मास मंगलं । वेदांश्च पाठयामास पुराणानि रमापतिः । शनिस्तु लज्जितं दृष्ट्वा पार्वती कोपशालिनी । शशाप
च सभामध्ये अंगहीनो भवेति च । दृष्ट्वा शप्तं शनिं सूर्यः कश्यपश्च यमस्तथा । ते तु रुष्टाः समुत्तस्थुर्गेहमुक्ताः ३३
शंकरालयं । सुवह्नास्ते रक्तमुखाः कोपप्रस्फुरिताधराः । तैर्धर्मसाक्षिणं कृत्वा विष्णुश्च शंभुमुख्यताः । ब्रह्मा तान्
बोधयामास विष्णुना प्रेरितः सुरैः । रक्तास्या पार्वती चैव कोपप्रस्फुरिताधरा । केशवेन मुनयस्तेन तत्र क्रमे(

६५×

णमभयो चीता नारदो पर्वताः स्वाभा मुनयोः पर्वतास्तथा । कश्यप उवाच । अहं शंपं शकुनेन पत्नीशापेन(
सर्वदाः बालं ददर्श यत्नेन तस्यैवमातृराज्ञया । श्रीसूर्य उवाच । तं धर्मसाक्षिणं कृत्वा पुत्रस्य मातुराज्ञ(
स्वय या । मत्पुत्रो नितिदर्दृष्टिर्यत्नेन ददर्श पार्वतीसुतं । यथा निरापराधेन मत्पुत्रं साशशापरु । तत्पुत्रस्यांग
भंगश्च भविष्यति न संशयः । यम उवाच । प्रदायैमाज्ञां च शशापस्त्वयं कथं । वयं शशापामः क्रोधश्चे
जीघांसो स्वविच्छिसने । ब्रह्मोवाच । शशाप पार्वती रुष्टा स्त्रीस्वभावाच्चापलात् । सर्वेषां साधने वक्तुं ने
तुमर्हति साधवः । दुर्गे त्वमाज्ञां दत्वा च पुत्रं दर्शनहेतवे । कथं शपसि निर्दोषमतिथित्वकृतं हा(
गतं । इत्युक्त्वा शनिमानीय बोधयित्वा तु पार्वती । तां तं समर्पयामास च केशापमोचनहेतवे । बभूव
पार्वती तुष्टा ब्रह्मणो वचनान्मुने । शांता बभूवुः स्ते तत्र दिनेशयमकश्यपाः । उवाच पार्वती
तत्र संतुष्टां तं शनैश्चरं । प्रसादिता शिवेनैव ब्रह्मणा परिसेविताः । पार्वत्युवाच । ग्रहराजो भव

ध्यानेन मद्वरेणैव हरिप्रियः। नारंजीवा च योगींद्रो भक्तस्य काचिदुपद्रवेत्। अथ प्रभृति निर्विघ्नो ह
२३ रेर्भक्तो ईदृशः स्तुते। त्वन्मनोगौर्यो मोघतो वै किंचित्स्वं जो न विष्यति। इत्युक्त्वा पार्वती तुष्टा बालं
कृत्वा च वक्षसि। उवास पोषितां मध्ये तस्मै दत्वा शुभाशिषं। शनिर्जगाम देवानां समीपं हृष्टमा
नसः। प्रणम्य भक्त्या तं ब्रह्मन्नंबिकां जगदंबिकां॥ इति श्री ब्रह्मवैवर्ते महापुराणे नारायण
नारदसंवादे गणपतिखंडे विघ्नापखंडनं नाम द्वादशोऽध्यायः॥ श्रीनारायण उवाच। अथ विष्णुः
शुभे काले देवैश्च मुनिभिः सह। पूजयामास तं बालमुपहारैरनुत्तमैः। सर्वाग्रे तव पूजा च मया दत्ता
सुरोत्तमः। नत्वाकुमरणं वक्के मुनिभिश्च समं सुरैः। विघ्नेशश्च गणेशश्च हेरंबश्च गजाननः। लंबोद ॥३४॥
रश्चैकदंतः शूर्पकर्णो विनायकः। एतान्यष्टौ च नामानि तच्चकार सनातनः। आशिषं दापयामास चा
नयामास तान् मुनीन्। सिंहासनं ददौ धर्मस्तस्मै ब्रह्मा कमंडलुं। शंकरो योगपदं च तत्वज्ञानं सुदुर्ल

भं। रत्नसिंहासने शक्रः सूर्यश्च मणिकुंडले। माणिक्यमालां चंद्रश्च कुबेरश्च किरीटकं। वह्निः शुद्धं च वस
नं ददौ तस्मै कृतांतनः रत्नछत्रं च वरुणो वायू रत्नांगुरीयकं। क्षीरोदोऽद्भवसद्रत्नरचितं वलयापरं। मंजीरं
चापि केयूरं ददौ पद्मालया मुने। कंठभूषां च सावित्री भारती हारमुज्वलं। क्रमेण सर्वदेवाश्च देव्यश्च कौतुका कौ
द्दुदुः। मुनयः पर्वताश्चैव रत्नानि विविधानि च। वसुंधरा ददौ तस्मै वाहनाय च मूषिकं। क्रमेण देवा देव्यश्च मु
नयः पर्वतास्तथा। गंधर्वाः किंनरा यक्षा मनवो मानवास्तथा। नानाविधानि द्रव्याणि स्वादूनि मधुराणि च।
२५ ता पूजां चक्रुश्च तैः सर्वैः क्रमेण भक्तिपूर्वकं। पार्वती जगतां माता स्मेरानना सरोरुहा। रत्नसिंहासने पु
त्रं वासयामास नारद। सर्वतीर्थोदकानां च कलशानां शतेन च। स्नापयामास वेदोक्तमंत्रेण मुनिभिः सह। अ
क ग्निशौचं वसनं ददौ तस्मै सती मुदा। गोदावर्युदकं पाद्यमर्घ्यं गंगोदकेन च। दुर्वाक्षतं पुष्पचंदनेन स
मन्वितं। पुष्करोदमानीय पुरा नराचमनीयकं। रत्नपात्रे मधुपर्कमासवं शर्करान्वितं। स्नानीयं विष्णुतैलं
क

चस्त्रं वैद्येन विनिर्मितं । अमूल्यरत्नरचितचारूणि भूषणानि च । पारिजातप्रसूतानां माल्यानां शतका
नि च । मालतीचंपकादीनां पुष्पाणि विविधानि च । पूजनार्हाणि पत्राणि तुलसीवर्जितानि च । चंदनागुरु
कस्तूरीकुंकुमानि च सादरं । रत्नप्रदीपशतकं धूपं च परितोदरी । तस्मिंश्चैव नैवेद्यं तिललड्डुकपर्वतं ।
पक्वान्नानां पर्वतं च सुस्वादु सुमनोहरं । पर्वतं स्वस्तिकानां च सुस्वादु शर्करान्वितं । गुडकानां च लाजानां
पृथुकानां च पर्वतं । शाल्यन्नानां पिष्टकानां पर्वतं व्यंजनैः सह । कलसानां पयसां लक्षाणि प्रददौ मुदा । ल
क्षाणि कलसानां च दध्नां नारद पूजने । मधूनां कलसानां च त्रिलक्षाणि च सुंदरी । सर्पिषां कलसानां च लं
पंचलक्षाणि सादरं । दाडिमानां श्रीफलानां असंख्यानि फलानि च । खर्जुराणां कदंबानां जंबूनां विविधा
नि च । आम्राणां पनसानां च कदलीनां च नारद । फलानि नारिकेलानाम् असंख्यानि ददौ मुदा । अन्यानि
परिपक्वानि कालदेशोद्भवानि च । ददौ तानि महामाया स्वादूनि मधुराणि च । स्वच्छं सुनिर्मलं चैव क २५

र्पूरादिसुवासितं । गंगाजलं च पानार्थं पुनराचमनीयकं । ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितं । सुव
र्णपात्रशतकं परिपूर्णं च नारद । शैलेश्वरी शैलराजः शैलजः शैलराजजः । शैलराजप्रियामात्याः
पुत्रजुशैलजात्मजं ॐ ह्रीं श्रीं क्लीं गणेशाय ब्रह्मरूपाय चापरे सर्वसिद्धिप्रदेशाय विघ्नेशाय नमो नमः
इत्यनेनैव मंत्रेण दत्वा द्रव्याणि भक्तितः । सर्वे प्रमुदितास्तत्र ब्रह्मविष्णुशिवादयः । द्वात्रिंशदक्षरो माला
मंत्रोयं सार्वकामिकः । धर्मार्थकाममोक्षाणां फलदः सर्वसिद्धिदः । पंचलक्षजपेनैव मंत्रसिद्धिस्तु मंत्रि
णः । मंत्रसिद्धिर्भवेद्यस्य स च विष्णुश्च नारद । विघ्नानि च पलायंते तन्नामस्मरणेन च । महावाग्मी सदा सि
द्धः सर्वसंपत्समन्वितः । वाक्पतिर्जडतां याति ॰ तस्य मात्रात्सुनिश्चितं । महाकवींद्रो गुरवो नूनं विदुषां च
गुरोर्गुरुः । संपूज्यानेन मंत्रेण देवा आनंदसंप्लुताः । नानाविधानि वाद्यानि वादयामासुस्तत्र वै । ब्राह्मणा
न्भोजयामासुः कारयामासुरुत्सवं । ददुर्दानानि तेभ्यश्च बंदिभ्यश्च विशेषतः । नारायण उवाच । अ

स्तो॰

थ विष्णुस्तत्रामध्ये संपूज्य तं गणेश्वरं तुष्टाव परया भक्त्या सर्वविघ्नविनायकं। विष्णुरुवाच ईश त्वां
त्वां स्तोतुमिच्छामि ब्रह्मज्योतिः सनातनं निरूपितुमशक्तोऽहमणिरूपमनुहकं। १। प्रवरं सर्वदेवानां
सिद्धानां योगिनां गुरुं सर्वस्वरूपं सर्वेशं ज्ञानराशिस्वरूपिणं। २। अव्यक्तमक्षरं नित्यं सत्यमात्मस्व
रूपिणं। वायुतुल्यातिनिर्लिप्तमक्षतं सर्वसाक्षिणं। संसारार्णव पारे च मायायोते सुदुर्लभे कर्ण
धारस्वरूपं च भक्तानुग्रहकारकं। ४। वरं वरेण्यं वरदं वरदानामपीश्वरं। सिद्धं सिद्धिस्वरूपं च सिद्धि
दं सिद्धसादनं। ५। ध्यानातिरिक्तं ध्येयं च ध्यानासाध्यं च धार्म्मिकं धर्मस्वरूपं धर्मज्ञं धर्माधर्मफल
प्रदं। ६। बीजं संसारवृक्षाणामंकुरं च तदाश्रयं स्त्रीपुंनपुंसकानां च रूपमेतदतीन्द्रियं। ७। सर्वाद्य ३६
मग्रपूज्यं च सर्वपूज्यं च गुणार्णवं। स्वेच्छया सगुणं ब्रह्म निर्गुणं चापि स्वेच्छया। ८। स्वयं प्रकृतिरूपं च प्रा
कृतं प्रकृतेः परं। ९। त्वां स्तोतुमक्षमोऽनंतः सहस्रवदनेन च। न क्षमः पंचवक्त्रश्च न क्षमश्चतुराननः।

सरस्वती न शक्ता च न शक्तोऽहं तव स्तुतौ। न शक्ताश्च चतुर्वेदाः के वा ते वेदवादिनः। इत्येवं स्तवनं कृत्वा सु
रेशं सुरसंसदि। सुरेशश्च सुरैः सार्द्धं विरराम रमापतिः। इदं विष्णुकृतं स्तोत्रं गणेशस्य च यः पठेत् सा
यं प्रातश्च मध्याह्ने भक्तियुक्तः समाहितः तद्विघ्ननिघ्नं कुरुते विघ्नेशः सततं मुने वर्द्धयेत्सर्वकल्याणं क
ल्याणजनकः सदा। १४। यात्राकाले पठित्वा तु यो याति भक्तिपूर्वकं तस्य सर्वाभीष्टसिद्धिर्भवत्येव न संशयः।
१५। तेन दृष्टं च दुःस्वप्नं सुस्वप्नमुपजायते कदाचित् न भवेत्तस्य ग्रहपीडा च दारुणा। १६। भवेद्विनाशः शत्रु
णां वधूनां च विवर्द्धनं शश्वद्विघ्नविनाशश्च शश्वत्संपद्विवर्द्धनं। १७। स्थिरा भवेद्गृहे लक्ष्मीः पुत्रपौत्रविव
र्द्धिनी। सर्वैश्वर्ययुतो ह्येव सर्वत्र विष्णुपदं लभेत्। १८। फलं च सर्वतीर्थानां यज्ञानां यद्भवेद्ध्रुवं महतां स
र्वदानानां श्रीगणेशप्रसादतः। इति श्रीब्रह्मवैवर्त्ते महापुराणे गणेशस्तोत्रं। नारद उवाच श्रुतं
स्तोत्रं गणेशस्य पूजनं च मनोहरं कवचं श्रोतुमिच्छामि सांप्रतं भवतारणं। नारायण उवाच पूजाया

सुनिवृतायांसभामध्येशनैश्वरः उवाचविष्णुंसर्वेषांस्वामिनोजगतांगुरुं शनैश्वरउवाच सर्ववि
घ्नविनाशायदुःखवप्रशमनायच कवचंविघ्ननिघ्नस्यवदवेदवदांवर बभूवनोविवादस्यशान्त्याच
माययासह तद्विघ्नप्रशमार्थंचकवचंधारयाम्यहं विष्णुरुवाच विनायकस्यकवचंत्रिषुलोकेषुदुर्ल्ल
भं सुगोप्यंचपुराणेषुदुर्ल्लभंचागमेषुच उक्तंकुथुमिशाखायांसामवेदेमनोहरं कवचंविघ्ननाथस्य
सर्वविघ्नहरंपरं राज्यंदेयंशिरोदेयंप्राणादेयाश्चसूर्य्यज एवंभूतंचकवचंनदेयंप्राणसंकटे आवि
र्भवतिरामावःस्वेच्छयायस्यमायया नित्यायमेकदंतस्यकवचंचास्यवत्सक पूजास्यनित्यास्तोत्रंचक
ल्पेकल्पेस्तिसंततं आस्यास्यजन्मनःपूर्वंमुनयश्चासिस्तत्रविरे यथामरवतारेषुजन्मविग्रहधारणं त २१
थागणेश्वरस्यापिजन्मशैलसुतोदरे पठित्वामुनयःसर्वेजीवन्मुक्ताश्चभारते निःशंकाश्चसुरासर्वेश
त्रुपक्षविमर्दकाः कवचंबिभ्रतांमर्त्यानांयातिसन्निधौभिया नासुर्म्ययोनाशुभंच ब्रह्माण्डेनपराजयः

स्त्रीलक्षंजपेनैवसिद्धंचकवचंभवेत् योभवेत्सिद्धिकवचोमृत्युंजेतुंसचक्षमः आसिद्धकवचोवाग्मी
चिरजीविमहीतले सर्वत्रविजयीपूज्योभवेद्ग्रहणमात्रतः मालामंत्रमिमंपुण्यंकवचंवेदमेवच वि
भ्रतांसर्वपापानिप्रणश्यंतिसुनिश्चितं प्रेतभूतपिशाचाश्चकुष्मांडाब्रह्मराक्षसा डाकिन्यायोगिनश्चैव
वेतालादयएवच बालाग्रहाग्रहाश्चैवक्षेत्रपालादयस्तथा तेषांचशब्दमात्रेणपलायंतेचभीरवः आ
धयोव्याधयोमोहाशोकाश्चैवभयावहाः नयांतिसंन्निधितेषांगरुडस्ययथारगाः स्वजनेगुरुभक्तायस्व
शिष्यायप्रकाशयेत् खलायपरशिष्यायदत्वामृत्युमवाप्नुयात् संसारमोहनस्यास्यकवचस्यस्यप्र
जापतिः ऋषिश्छंदश्चगायत्रीदेवोलंबोदरःस्वयं धर्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः सर्वेषां
कवचानांचसारभूतमिदंमुने ॐगोंगंश्रीगणेशायस्वाहामेपातुमस्तकं द्वात्रिंशदक्षरोमंत्रोललाटं
मेसदावतु ॐह्रींक्लींश्रींगमितिचसंततंपातुलोचनं तारकांपातुविघ्नेशःसंततंधरणीतले ॐह्रीं

श्रींक्लींइतिचमलतंपातुनासिकां। ॐगींगंसूर्यकर्णायस्वाहा।पातावधरंममदंतानिताल्लुकंजि ह्वांपा।
तुमेषोडशाक्षरा। ॐश्रींलंबोदरायइतिस्वाहागंडंसदावतु। ॐश्रींगांगजाननायेतिस्वाहास्कंधंसदावतु
ॐह्रींविनायकायेतिस्वाहापृष्ठंसदावतु। श्रींक्लींह्लींइतिकंकालंपातुवक्षःस्थलंचगं। करौपादौसदापातु
सर्वांगंविघ्ननिघ्नकृत्। प्राच्यांलंबोदरःपातुआग्नेय्यांविघ्ननायकः दक्षिणेपातुविघ्नेशोनैर्ऋत्यांतुगजान
नः। पश्चिमेपार्वतीपुत्रोवायव्यांशांकरात्मजः। कृष्णस्यांशश्चोत्तरेचपरिपूर्णतमस्यच। ऐशान्यामेकदंतश्च
हेरंबःपातुचोर्ध्वतः। गणाधिपोऽप्यधःपातुःसर्वपूर्ज्यश्चसर्वतः। स्वप्नेजागरणेचैवपातुमेयोगिनांगुरुः
इतितेकथितंवत्ससर्वमंत्रौघविग्रहं। संसारमोहनंनामकवचंपरमाद्भुतं। श्रीकृष्णेनपुरादत्तंगोलोके ।।३७।।
रासमंडले। वृंदावनेविनीतायमह्यंदिनकरात्मजः। मयादत्तंचतुभ्यंयस्मैकस्मैनदास्यति। परंवरंस
र्वपूज्यंसर्वसंकटतारणं। गुरुमभ्यर्च्यविधिवत्कवचंधारयेत्तुयः। कंठेवादक्षिणेबाहौसोपिविष्णुर्न

संशयः। अश्वमेधसहस्राणिवाजपेयशतानिच। ग्रहेंद्रकवचस्यास्यकलांनार्हंतिषोडशीं। इदंकवच
५ मज्ञात्वायोभजेच्छंकरात्मजं। शतलक्षप्रजप्तोपिमंत्रसिद्धिर्नदायकः।। ।।इतिश्रीब्रह्मवैवर्त्तेसंसारमो
हनंनामकवचं।। रवेरिदंसूर्य्यपुत्रायविरराममुरेश्वरः। परमानंदसंयुक्तादेवाऊचुःसमाप्यतः।। ।।इति
श्रीब्रह्मवैवर्त्तेमहापुराणेनारायणनारदसंवादेगणपतिखंडेगणेशपुजाभ्यवकवचंनामत्रयोदशो
ध्यायः।। ।।नारायणउवाच।। ।।देवाविष्णुःसनायांतेसर्वेप्रहृष्टमानसाः। गंधर्वामुनयःशैलाः
पश्यंतःसुमहोत्सवं। एतस्मिन्नंतरेदुर्गास्मेराननसरोरुहा। उवाचविष्णुंप्रणतादेवेशंदेवसंस
दि।।पार्वत्युवाच।। त्वंपाताश्वसर्वजगतांनाथनारुजगद्धरिः कथंमत्स्वामिनोवीर्य्यममोघंरक्षितंप्रभो।।
रतिभंगःकृतोदेवेब्राह्मणाप्रेषितोस्त्वया भूमौनिपतितंकेनदेवेनलब्धिनिष्फलं सर्वेदेवास्त्वत्पुरतस्त
द्वेषणंमीश्वर। अराजकंकथंयुक्तंतिष्ठतिस्त्वयिराजनि। पार्वतीवचनंश्रुत्वाप्रहस्यजगदीश्वरः

उवाच देववर्गाश्च मुनिवर्गश्च तिष्ठति ॥ विष्णुरुवाच ॥ देवाः शृणुत तद्वाक्यं पार्वतीवचनं श्रुतं ॥
मा शिवस्याग्रे षट्वार्य्यं यत्पुरा केन निवारितं ॥ सभामानयत क्षिप्रं न चेत्सदंडमर्हति ॥ सक्रो राजानु
शास्त्राय प्रजाराध्यश्च पाहि कः ॥ विष्णोस्तद्वचनं श्रुत्वा समीक्ष्य परस्परं ॥ अब्रुवन्सर्वे क्रमेणैव शानि
ग्गोताः पुरा तो हरे ॥ ब्रह्मोवाच ॥ तद्वीर्य्यं निकृतं येन पुण्यक्षेत्रे च भारते ॥ सर्ववित्तो भवत्तत्र पुण्ये हे पुण्य
कर्म्मणि ॥ महादेव उवाच ॥ स्ववीर्य्यं निकृतं येन पुण्ये तु मोच भारते ॥ सर्ववित्तो भवत्तत्र सेवने हृत
ने तत्र ॥ यम उवाच ॥ सर्ववित्तो ह्यरण्यगमरहणे ॥ एकादशीव्रते चैव तद्वीर्य्यं येन निकृतं ॥ इंद्र उ
वाच ॥ तद्वीर्य्यं कृतं येन पापिना पापमोचने ॥ भवत्सुत्रयशो लुप्तं तत्पुण्यकर्म्मसंततं ॥ वरुण उवा ३९
च ॥ भवेत्तत्र कलौ जन्म सन्यासो वा भवेत्तरे ॥ शूद्रायां जन्म पत्न्यां च गर्भे तद्येन निकृतं ॥ कुबेर उवाच
स्थाप्यहारी स भवेत्तु मित्र्वासघातश्च मित्रहा ॥ मत्पथस्य कृतं घस्रुत तद्वीर्य्यं येन निकृतं ॥ ईशान उवा

च ॥ परद्रव्यापहारी च भवेत्तत्र च भारते ॥ नरघाती गुरुद्रोही तद्वीर्य्यं येन निकृतं ॥ रुद्रा ऊचुः ॥ ते मिथ्या
वादिनः संतु भरघारदारिकाः ॥ गुरुनिंदारताः शश्वत्तद्वीर्य्यं येश्च निकृतं ॥ कामदेव उवाच ॥ कृतप्रतिज्ञां
यो मूढो न संपादयति भ्रमात् ॥ भाजनं तस्य पापस्य भवेद्येन निकृतं ॥ मातुः पितुर्गुरोश्चैव स्त्री पुत्राणां च
पोषणे ॥ भवतां च वित्तोतो चयाभ्यां वीर्य्यं च निकृतं ॥ सर्वे देवा ऊचुः ॥ मिथ्या सात्यप्रहातारो न वंतत्र च भारते
अपुत्रीणां दरिद्राश्च वीर्य्यं वीर्य्यं विनिकृतं ॥ देवपत्न्यस्तु ऊचुः ॥ ता नि रतु स्वभर्त्तारं गच्छंतु परपुरुषं ॥ संतु
बंधुविनहानाश्च याभिर्वीर्य्यं च निकृतं ॥ देवानां वचनं श्रुत्वा देवीनां च हरिः स्वयं ॥ कर्म्मणां साक्षिणं धर्म्मं सु
र्य्यं चंद्रं हुताशनं ॥ पवनं पृथ्वीं तोयं संध्ये रात्रिदिनं मुने ॥ उवाच जगतां कर्त्ता पाता त्राता च जगत्त्रये ॥ वि
ष्णुरुवाच ॥ देवेनर्निकृतं वीर्य्यं तद्दत्तकेन निकृतं ॥ तदमोघं भगवतो महेशस्य जगद्गुरोः ॥ यूयं तु साक्षि
णो विश्वे संततं सर्वकर्म्मणां ॥ युष्माभिर्निकृतं को वा किं भूतं वक्तुमर्हथ ॥ ईश्वरस्य वचः श्रुत्वा सभायां

कृपिताश्च पुले परस्परं समालोच्य क्रमेणोचुः पुरो हरेः धर्म्म उवाच एले रुत्ता दृष्टो नो वीर्यं पपात व
सुधातले मया ज्ञातं अमोघं तत् शंकरस्य प्रकोपतः क्षितिरुवाच वीर्य्यं वोढुं मशक्ताहं तद्दत्तौ न्यह्नि
पं पुरा ॥ अतीव दुर्वहं ब्रह्मन्न वलांहं तु मर्हसि अग्निरुवाच वीर्य्यं वोढुमशक्तोहं न्यह्लिपं शरकानने
दुर्वलस्य जगन्नाथ किं नयः किं च पौरुषं वायुरुवाच शरेषु पतितं वीर्य्यं सद्यो वालो वभूव ह अतीव
सुंदरो विष्णो स्वर्णरेखा नदीतटे सुर्य्य उवाच रुदंतं वालकं दृष्ट्वा गमम स्ताचलं प्रभो प्रेरितः काल
चक्रेण निशायां हं स्थातुमक्षमः चंद्र उवाच रुदंतं वालकं प्राप्य गृहीत्वा कृतिकागणः जगाम स्वालयं
विष्णो गच्छन् वदरिकाश्रमात् जलमुवाच अमुं रुदंतमानाय स्तनं दत्वा स्तनार्थिने वर्द्धयामासुरी(॥३७॥
शस्य सुतं सुर्य्याधिपः प्रभुः संध्योवाच अधुना कृतिकानां च षण्णां तत्पोष्यपुत्रकः तन्नामं चक्रुः स्ताः
प्रेम्णा कार्त्तिक इति कौतुकात् रात्रिरुवाच नवकुर्वालकं ताश्च लोचनानामगोचरं प्राणेभ्योपि

प्रेमपात्रं यः शोशात स्वपुत्रकः दिनमुवाच यानि यानि च वस्तूनि त्रैलोक्ये दुर्लभानि च प्रसंमितानि
स्वादूनि भोजयित्वासु वेवनं तेषां तद्वचनं श्रुत्वा स उष्टो मधुसूदनः ते सर्वे हरिरित्यूचुः समायां हृष्टमानसाः
पुत्रस्य वार्त्तां संप्राप्य पार्वती हृष्टमानसा कोटि रत्नानि विप्रेभ्यो वासांसि विविधानि च हरो सर्वाणि वि
प्रेभ्यो वासांसि विविधानि च लक्ष्मी सरस्वती मेना सावित्री सर्वयोषितः विष्णुश्च सर्वदेवाश्च ब्राह्मणेभ्यो
ददुर्धनं ॥ ॥ इति श्री ब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखंडे कार्त्तिकप्रवृत्तिप्राप्ति
र्नाम चतुर्दशोध्यायः ॥ ॥ नारायण उवाच ॥ ॥ पुत्रस्य वार्त्तां संप्राप्य पार्वत्या सह शंकरः प्रेरितो विष्णुना
देवैर्मुनिभिः पर्वते मुने दूतान् प्रस्थापयामास महाबलपराक्रमान् विर्य्यभद्रं विशालाक्षं शंकुकर्णं कि
रक्रमं नंदीश्वरं महाकालं वज्रदंतं भगंदरं गोधामुखं दधिमुखं ज्वलदग्निशिखोपमं लक्षं च क्षेत्रपाला(
नां भूतानां च त्रिलक्षकं वेतालानां चतुर्लक्षं यक्षाणां पंचलक्षकं कुष्मांडानां चतुर्लक्षं त्रिलक्षं ब्रह्मराक्षसां

डाकिनिनांचतुर्लक्षंयोगिनीनांत्रिलक्षकं रुद्रांश्चभैरवांश्चैवशिवतुल्यपराक्रमान् अन्यांश्चविक्रमाकारान् असंख्यानपिनारद तेसर्वेशिवदूताश्चनानाशस्त्रास्त्रपाणयः कृत्तिकानांचभवनंवेष्टयामासुरुल्वणाः दृष्ट्वातान्कृत्तिकाःसर्वाभयविह्वलमानसा कार्त्तिकंकथयामासुर्ज्वलंतंब्रह्मतेजसा कृत्तिकाउवाच असंख्यान्यसंख्यानिवेष्टयामासुरालयं नजानीमोवयंकस्यकरालानिचकार्त्तिक कार्त्तिकउवाच भयंत्यजतकल्याणाभयंकिंवोमयास्थिते दुर्निवारोऽयमभिषेकश्चमातरः केनवार्यते एतस्मिन्नंतरेतत्रसेनेंद्रोनंदीकेश्वरः पुरतः कार्त्तिकस्यापितिष्ठंतामामुवाचह नंदीश्वरउवाच भ्रातः प्रवृत्तिमत्रशृणुमेमातरश्चशुभावहां प्रेषितस्यसुरेंद्रस्यसंहर्तुःशंकरस्यचः कैलासेसर्वदेवाश्चब्रह्मविष्णुशिवादयः सभायांतेवसंतश्चगणेशोत्सवमंगले शैलेंद्रकन्यातंविष्णुर्जगतांपरिपालकं संशोध्यकथयामासतवान्वेषणहेतुकं पप्रच्छदेवान्विष्णुस्तानक्रमेणप्रासंगिकंतवे ॥ ४१ ॥

तत्र

प्रत्यंतरंददस्तेतुप्रत्येकंचयथोचितं सभमत्रकृत्तिकास्थानेकथयामासुरीश्वरः सर्वेधर्माःयेदेवाधर्माधर्मस्यसाक्षिणः पार्वत्युवाचकुत्रऽगणपतिःशिवयोःपुरा इदंस्मेचसुरैःशंभोवीर्यंभूमौपपातह भूमिस्तदग्नियुद्धक्रोधकृत्तिश्चसुरकाननेवे तत्वंलग्नकृत्तिकाभिरपुनिर्गच्छसांप्रतं तवाभिषेकंविष्णुश्चकरिष्यतिसुरैःसह हरिष्यसितारकारव्यंसर्वशास्त्रंलप्स्यसि पुत्रस्त्वंविश्वसंहर्तुस्तेयोषामुमहात्माइमाः कृत्तिकाःसुयथाशक्रःशक्रस्वःस्वकोदरे दिव्यमासंचविश्वेश्वरैतासांगेहेष्वशोभसे यथायतंत्वन्महाकमेष्विनराजोनराजते करोषिजगतांलोकंनात्रत्रासमासुलजसा यथासूर्यःकराछत्रानभवन्मानवस्यच विष्णुंस्त्वंचजगद्व्यापीनासांयोंपोसिशोभव यथानकेषांव्याप्यंचतंसर्वव्यापकंतनः योगिद्रणांतुलिमस्त्वंयोगीचेत्यरिपालने नेवलीसोयथात्माचकर्मभोगेचजीवितं विष्णुरंभसस्त्वमीशाश्चनासुतेसंभवस्थितिः सागरस्ययथानद्यासरितामाससमस्यच नहिसर्वस्त्रिषुसर्वासुःसंनवेकृत्तिकालये गरुडस्ययथावासःसुद्रे

त्था

वटककोटरे त्वांच देवानजानंतीत्यकानुग्रहकातरं गुणानांतेजसांराशिंयथात्मानंचयोगिनः त्वाम
नुर्वचनीयंचकिंवाजानंतिकृत्तिकाः यथापराह्नरेभक्तिर्नभक्तामूढचेतसा भ्रातर्येयंनजानंतितेनत्वंकु
र्वंत्यनादरं ताड्यंतेयथानेकास्त्वेकथांसाश्चपंकजात् कार्त्तिकउवाच भ्रातःसर्वंविजानामिज्ञानंत्रैका
लिकंचयत् जानीतंकामसंसारे यतोमृत्युजरायाश्रिताः कर्मणाजन्मयेषांवायासुयासुचयोनिषु तासु
तेनिर्वृत्तिंभ्रांत प्राप्नुवंतितिसंततं येयत्रसंतिसतोवामूढावाकर्म्मभोगतः तेपितंबहुमन्यंतेमोहिताविष्णु
मायया सांप्रतंजगतांमाताविष्णुमायासनातनि सर्वाधासर्वरूपाचसर्वाद्यासर्वमंगला शैलेंद्रपत्न्याः
श्रीगर्भेसाल्लब्धासजन्मनारते दारुणंवतपस्तप्त्वासंप्राप्यशंकरंपतिं ब्रह्मादिस्तंबपर्यंतंसर्वंमिथ्यै ॥ ४२ ॥
वकृत्रिमं सर्वेषांलक्ष्मीभृत्वाकालेविलीनास्तत्रकेवलंयं कल्पेकल्पेजगन्मातामातामेप्रतिजन्मनि
नि मेमस्तनंपयःश्रीमयावयोनित्यःसृष्टिविधावहं प्रसूतेरूद्भवाःसर्वजगन्नुर्वपोषितः काश्चिद्दंशाकलाःका

श्चित्कलांशांशेनकाश्चनः कृत्तिकाज्ञानवन्याश्चयोषितःप्रसूतेकलाः स्तनेनानान्निवर्द्धितोहंयुयमहोरेण
संततं आसांमहोपोष्यपुत्रोभवदंवाः पोषणादिमाः तस्याश्चप्रसूलेपुत्रोयतस्तस्तामिवीर्य्यज नगर्भजोहं
शैलेंद्रकन्यायानदिरीश्वरः साचमेधर्षितामातायथामाःसर्वसंमताः स्तनदात्रीगर्भदाधात्रीनक्षदात्रीगु
रुप्रीया अभीष्टदेवपत्नीपितुःपत्नीचकन्यका सगर्भःकन्याभगिनीपुत्रपत्नीप्रियाप्रसूः मातुर्मातापितु
र्मातासोदरस्यप्रियातथा मातुपितुश्चभगिनीमातुलानीतथैवच जगतानांदेवविहितामातरःषोडश
स्मृताः इमाश्चसर्वसिद्धिज्ञाःपरमेश्वर्यसंयुताः नहुद्राःब्रह्मणःकन्यास्त्रिषुलोकेषुपूजिताः विष्णुना
प्रेषितस्त्वंचशंभोःपुत्रसमोमहान् गच्छयामित्वयासार्द्धंद्रष्टाभिदेवताकुलं ॥ ॥ इतिश्रीब्रह्मवैवर्त्ते
महापुराणेनारायणनारदसंवादेगणपतिखंडेनारदकार्त्तिकेयसंवादेपंचदशोऽध्यायः ॥ १५ ॥ ॥
नारायणउवाच ॥ ॥ इत्येवमुक्त्वातंशीघ्रंसंबोध्यकृत्तिकागणं उवाचनीतयुक्तंचवचनंशंकरात्मजः

॥ कार्त्तिकउवाच ॥ यास्यामिशंकरस्थानंप्रेक्ष्यामिदेवताकुलं। मातुरंबंधुवर्गांश्चविहायंहेहिमालय॥
देवाधीनंजगत्सर्वंजन्मकर्मशुभाशुभं। संयोगाश्चवियोगाश्चनचदेवात्परंबलं। कृष्णायत्तंचतद्देवंस
देवात्परतस्ततः। भजंतिसिद्धिंसततंसंतःपरमात्मानमीश्वरं। देवंवर्द्धयितुंशक्तःक्षयंकर्त्तुंस्वलीलया। नंदे
वक्षस्तज्ज्ञश्चाविनाशीचनिर्गुणः। तस्माद्भजतगोविंदंमोहंत्यजतदुःखदं। सुखदंमोहदंसारंजन्ममृत्यु
भयापहं। परमानंदजनकंमोहजालनिकृंतनं। यंभजंतियंसर्वेब्रह्मविष्णुशिवादयः। कोहंभवान्वाशैल।
युष्माकंकावायूयंममकोविकाः। तत्कर्मस्रोतसासर्वपुंजीभूतचफेनवत्। संश्लेषंविपरितंवालस्समेवंमी
श्वरेच्छया। ब्रह्मांडभाण्डघटाधानंनस्वतंत्रंविदुर्बुधा। जलबुद्बुदवत्सर्वमनित्यंचजगत्त्रयं। मायामनित्यंकु ॥ ४३
र्वंतिमायायांमूढचेतसः। संतस्तत्रनलिप्यंतिवायुवत्कस्यचेतसः। तस्मान्मोहंपरित्यज्यविदायंदेहि
मातरः। इत्येवमुक्त्वानत्वाताःसार्द्धंशंकरपार्षदैः। यात्रांचकारभगवान्मनसाश्रीहरिंस्मरन्स्मरन्। एत

त्रंतरेतत्रददर्शरथमुत्तमं। विश्वकर्मविनिर्माणंहीरकेनपरिष्कृतं। सद्रत्नसारखचितंमाणिक्येनविराजितं
पारिजातप्रसूनानांमालाजालैःसुशोभितं। मणिदर्पणैःश्वेतचामरैरतिदीपितं। क्रीडार्थैर्मंदिरैरम्यै
श्चित्रैश्चित्रितंवरं। शतचक्रंसुविस्तीर्णंमनोयायिमनोहरं। प्रस्थापितंचपार्वत्यावेष्टितंपार्षदैर्वरैः। त
मारुह्यतंयानंताहृदयेनविदूयता। सहसाचेतनांप्राप्यमुक्तकेश्यश्रुपातुराः। दृष्ट्वाचस्वरस्कंदंस्तनिताऽति
शोकतः। उन्मत्ताइतरेत्वेवंकुमारेनिरंतिया। कृत्तिकउवाच। किंकुर्मःक्वचयास्यामोवयंवत्सत्वयाश्र
या। विहायास्मान्क्वयासित्वंनायंधर्मस्तवाधुना। स्नेहेनवावर्द्धितोस्माभिःपुत्रोस्माकंस्वधर्मतः। नायंध
हि र्मोमातृवर्गान्प्रयुक्तःसुतंत्यजेत्। इत्युक्त्वाकृत्तिकाःसर्वाःकृत्वावक्षसिकार्त्तिकं। पुनर्मूर्च्छामवापुस्ताः
सुतविच्छेददारुणात्। कुमारोबोधयामासताअध्यात्मवचनेनवै। तानिश्चपार्षदैःसार्द्धमारुरोहरथंमु
ने। पूर्णकुंभंद्विजंवेश्यांशुक्लधान्यंचदर्पणं। दध्याज्यंमधुलाजंचपुष्पंदुर्वाक्षतंसितं। वृषंगजेंद्रंतुरंगं

ज्वलद्दग्नीसुवर्णकं। पर्णांश्च परीपक्वानि फलानि विविधानि च। पतिपुत्रवतीनारी प्रदीपं मणीमुत्त
मे। मुक्ताप्रसूनमालां च स्वधीमांत्र्यं वंदनं। हरिद्रशीतानि वस्तूनि मंगलानि पुरो मुने। श्रृगालं नकुलं चा
संश्चारं वा मेस्तु भावहं। राजहंसं मयूरं च खंजनं च शुकं पिकं। पारावतं शंखं चिह्नं च चक्रवाकं च मंगलं।
कस्तुसारं च सुरभीं च मरीचं तच्चामरं। धेनुं वत्सप्रयुक्तां च पताकां दक्षिणे शुभां। नानाप्रकारवाद्यं च शु
श्राव मंगलध्वनि। हरिशंखस्य मंगल्यं घंटाशब्दं च ध्वनितया। ह्रष्ट्वा श्रुत्वा मंगलं स जगाम तालमंदिरं।
ल कुमार श्चाग्रे कैलाशं न्यग्रोधाह्वय मूलकं। ततःगणेन स्वैः कृत्तिकाभिः पार्षदैः प्रवरैः सह। पार्वतीमंगलं कृता
राजमार्गं मनोहरं। पद्मरागेन्द्रनीलैः संस्कृतं परितः पुरं। रंभास्तंभसमूहैः स्वपदमूलप्रबंधितैः। श्री
खंडपल्लवैर्युक्तं पूर्णकुंभैः सुशोभितं। पर्णराजफलैर्व्याप्तं सिक्तं चंदनवारिभिः। रत्नप्रदीपासंख्यैस्तु ॥४४॥
मणिराजिभिर्विराजितं। नटनर्तकवेश्यानां समूहैः संकुलं सदा। वंदिभिर्विप्रवर्गैश्च दूर्वापुष्पाकरैर्यु

तः। पतिपुत्रवतीभिश्च साध्वीभिश्च समन्वितः। लक्ष्मीसरस्वती गंगा सावित्री तुलसी रतिः। अरुंधती
महल्यां चदितितारामनोरमां। आदीतिशालरूपां च शचीं वा संध्याचरोहणी। अनुसूया च स्वाहा च संज्ञा
वरुणकामिनी। अकूती च प्रसूतिश्च देवहूतिश्च मेनका। नामेकपर्णमिनाककामिनी। वसुधरां च म
नसा पुरः कृत्वा समाययौ। रंभा तिलोत्तमा मेना घृताची रोहिणी शुभा। उर्वशी रत्नमाला च सुशीला
ललिताकला। कदंबमाला सुरसा वनमाला च सुंदरी। एताश्चान्याश्च वध्वश्च विप्रेन्द्राप्सरसां गणाः।
संगीतनर्त्तनपराः सस्मिता वेश संयुता। करतालकराः सर्वा जग्मुरानंदपूर्वकं। देवाश्च मुनयः शै
ला गंधर्वाः किन्नरास्तथा। सर्वे ययुः प्रमुदिताः कुमारस्यानुवर्जने। नानाप्रकारवाद्यैश्च रुद्रैश्च पार्ष
दैः सह भैरवैः क्षेत्रपालैश्च ययौ साई महेश्वरः। अथ शक्तिधरो दृष्ट्वा राजत् पार्वतीं सदा। अवरु
ह्य रथात्तूर्णं शिरसा प्रणनाम ह। तं पद्मा प्रमुखं देवीगणं च मुनिकामिनीः। शिवं च परया भक्त्या स

त:
र्व्विमां ताष्य यत्नतो ऽपि पार्वती कार्त्तिकं दृष्ट्वा क्रोडे कृत्वा चुचुम्ब च । शंकरश्च मुदा शैलाद्देवश्च शैल
योषितः । पार्वतीप्रमुखा देव्यो देवाश्च शंकरस्तथा । शैलाश्च मुनयः सर्व्वे ददुस्तस्मै शुभाशिषो । कुमारः
सगणैः सार्द्धमागत्य च शिवालयं । ददर्श तं सभामध्ये विष्णुं क्षीरोदशायिनं । रत्नसिंहासनस्थं च रत्नभू
षणभूषितं । धर्म्मब्रह्मेन्द्रचंद्रार्कवह्निवाय्वादिभिर्युतं । ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहविग्रहं । स्तूयमानं मु
नीन्द्रैर्देवेन्द्रैः सेवितं श्वेतचामरैः । तं दृष्ट्वा जगतां नाथं भक्तिनम्रात्मकंधरः । पुलकांकितसर्वांगः शिरसा प्र
णनाम ह । विधिं धर्म्मं च देवांश्च मुनीन्द्रांश्च मुदान्वितान् । प्रणनाम च प्रत्येकं प्राप तेषां शुभाशिषः । स
र्व्वान् संभाष्य प्रत्येकमुवास कनकासने । ददौ धनानि विप्रेभ्यः पार्वत्या सह शंकरः ॥ ॥ इति श्रीब्रह्मवै
वर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखंडे कार्त्तिकागमनं नाम षोडशोध्यायः ॥ ॥ नारायण ॥४५॥
उवाच ॥ ॥ अथ विष्णुर्जगत्कांतो हृष्टः कृत्वा शुभक्षणं । रत्नसिंहासने रम्ये वासयामास कार्त्तिकं

नानाविधानि वाद्यानि कांस्यतालादिकानि च । नानाविधानि यंत्राणि वादयामास कौतुकात् । वेदमंत्रा
भिषिक्तैश्च सर्वतीर्थोदपूर्णकैः । सहस्रकुंभशातकैः स्नापयामास तं मुदा । अमूल्यरत्नरचितकिरीटं
मुकुटांगदं । अमूल्यरचितभूषणानि बहूनि च । वह्निशुद्धांशुके दिव्ये क्षीरोदार्णवसंभवे । कौस्तुभं च
वनमालां च तस्मै च कंदरदौ मुदा । ब्रह्मा ददौ यज्ञसूत्रं वेदांश्च वेदमातरं । संध्यामंत्रं कृष्णमंत्रं स्तोत्रं च कव
चं हरेः । कमंडलुं च ब्रह्मास्त्रं विद्यां च वैरिमर्द्दिनीं । धर्म्मो धर्म्ममतिं दिव्यां सर्वजीवदयां ददौ । परं मृत्यु
जयज्ञानं सर्वशास्त्रावबोधनं । शाश्वत्सुखप्रदं तत्त्वज्ञानं च सुमनोहरं । योगतत्त्वं सिद्धितत्त्वं ब्रह्मज्ञानं
सुदुर्लभं । शूलं पिनाकं परशुं शक्तिं पाशुपतं धनुः । संहारास्त्रं विनिक्षेपं तत्संहारं ददौ मुदा । श्वेतछत्रं
रत्नमालां ददौ तस्मै जलेश्वरः । गजेंद्रं च महेंद्रश्च सुधाकुंभं सुधानिधिः । मनोयायिरथं सूर्य्यः सन्नाहं च म
हाभयं । यमदंडं यमश्चैव महाशक्तिं हुताशनः । नानाशस्त्राणि योयानि सर्वे देवा ददुर्मुदा । कामशास्त्रं
व नि प

कामदेवो ददौ तस्मै मुदान्वितः ॥ क्षीरोदो मुल्यरत्नानि विशिष्टं रत्ननूपुरं ॥ हिमालयो मयूरं च वाहना
र्थं च कुक्कुटं ॥ लक्ष्मीश्च परमैश्वर्यं नारली हारमुत्तमं ॥ सावित्री सिद्धिविद्यां च सर्वास्मा कौतुकं ददु ॥ पा
र्वती सस्मिता साक्षात् परमानंदमानसाः ॥ महाविद्यां सुशीलां च सत्यं मेधां दयां स्मृतिं ॥ बुद्धिं सुनिर्मलां शां
तिं तुष्टिं पुष्टिं क्षमां धृतिं ॥ सुदृढां च हरौ भक्तिं हरिदास्यं च यौ ददौ मुदा ॥ प्रजापतिर्देवसेनां रत्नभूषण
भूषितां ॥ सुविनीतां सुशीलां च सुंदरीं सुमनोहरां ॥ ददौ तस्मै विवाहेन वेदमंत्रेण नारद ॥ यां वदंति महा
षष्ठीं पंडिताः शिशुपालिकां ॥ अभिषिच्य कुमारं च सर्वैर्देवाः पयुग्रहं ॥ मुनयश्चैव गंधर्वाः प्रणम्य जग गणप
दीश्वराः ॥ नारायणं च ब्रह्माणं धर्मं तुष्टाव शंकरः ॥ प्रणेमुर्महर्षिताः तेथ धर्मस्तमालिंग्य नारद ॥ प्रीताय योच ॥४६॥
शैलेंद्रः सगणः शंकरार्चितः ॥ ये ये तत्र गताः सर्वे ययुरानंदपूर्वकं ॥ परमानंदसंयुक्तो देव्या सह महेश्व
रः ॥ कालांतरे च यान् सर्वान् पुनरानीय शंकरः ॥ पुत्राय ददौ विवाहेन गणेशाय महात्मने ॥ तुलास्यां सग

णेः सा ईया वर्ती हृष्टमानसा ॥ सिषिवे स्वामिनः पादपद्मं सा सर्वकामकं ॥ इत्येवं कथितं सर्वं कुमारस्याभि
षेचनं ॥ विवाहः पूजनं तस्य गणेशस्य विहकं ॥ पार्वतीपुत्रलाभश्च देवानां च समागमं ॥ कांते मनसि छामि
किं भूयः श्रोतुमिच्छसि ॥ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे नारायणनारदसंवादे गणपतिखंडे कुमारा
भिषेको नाम दशमोऽध्यायः ॥ ॥ नारद उवाच ॥ ॥ नारायण महाभाग वेदवेदांगकारण ॥ इच्छामि ता महं कि
विदतिसुंदेहमीश्वरः ॥ सुतस्य विदशोत्रास्य शंकरस्य महात्मनः ॥ विघ्ननिघ्नस्य यद्विप्र मीश्वरस्य कथं विनो ॥
पविघ्नं तमः श्रीमान् परमात्मा परात्परः ॥ गोलोकनाथः स्वांशेन पार्वतीतनयः स्वयं ॥ अहो भगवतस्तस्य
रमस्तकछेदनं विभो ॥ ग्रहदृष्टाग्रहे वास्यतन्मे संवक्तुमर्हसि ॥ नारायण उवाच ॥ सावधानं शृणु ब्रह्मन्निति
हासं पुरातनं ॥ विघ्नेशस्य विमिदं च स्तुबये न नारद ॥ एकदा शंकरः सूर्यं जघान परया क्रुधा ॥ मालि सुमा
लिहंतारं शूलेन भक्तवत्सलः ॥ श्रीसूर्यो व्यिर्यतुल्येन शिवतुल्येन तेजसा ॥ जहार चेतनां सघोरं यात्रु निप
ते ए

पालह दृष्ट्वा कश्यपः पुत्रं मृतपुत्रारलोचनं कृत्वा वक्षसि तं शोकाद्विललाप नरं मुहुः हाहाकारं सुरा
स्त्रस्ताश्चक्रुर्विलेपुर्भृशं अथीभूतं जगत्सर्वं ब्रवत मम माश्रमं निष्पंनं तनयं दृष्ट्वा शशाप कश्यप शिवं
तपस्वी ब्रह्मणः पौत्रः प्रज्वलन् ब्रह्मतेजसा मत्पुत्रस्य यथा वक्षश्छिन्नं शूलेन ते नय त्वत्पुत्रस्य शिरश्छि
न्नमेवं नुतं भविष्यसि शिवश्च गतः क्रोधः क्षणेनैवाशुतोषकः ब्रह्मज्ञानेन तं सूर्यं जीवयामास तत्क्ष
णे ब्रह्मविष्णुमहेशानामंशश्च त्रिगुणात्मकः सूर्यश्च चेतनां प्राप्य समुत्तस्थौ पितुः पुरः ननाम पितरं
नत्वा तं जामिक्क स्वामीश्वरं सर्वं तुच्छमनित्यं च नश्वरं चेश्वरं विना विहाय गलमस्तं विहायेच्छेस्मंगलं
दैवेश्च प्रेषितो ब्रह्मा सभमागत्य ससंभ्रमः बोधयित्वा रविं तत्र पुयोज विषये विभुः शिवस्तमाशिषं कृत्वा ॥४७॥
ब्रह्मा स्वं च स्वालयं मुदा जगाम कश्यपश्चैवं स्वराशिं रविरेव च अथ माली सुमाली च व्याधिग्रस्तौ बभू
वतुः श्वित्रौ गलितसर्वांगौ शक्तिहीनौ हतप्रभौ तावुवाच स्वयं ब्रह्मा युवां च न जतं रवि सूर्यकोपेन ग

लितौ युवामेवं हतप्रभौ सूर्यस्य कवचं स्तोत्रं सर्वं पूजाविधायकं जगाम कथयित्वा तौ ब्रह्मलोकं सना
तनं ततस्तौ पुष्करं गत्वा सिषेवाते रविं मुने स्नात्वा त्रिकालं भक्त्या च जपतौ मंत्रमुत्तमं ततः सूर्य्यवरं प्राप्य
निजरूपौ बभूवतु इत्येवं कथितं सर्वं किं पुनः श्रोतुमिच्छसि ॥ ॥इति श्रीब्रह्मवैवर्ते महापुराणे नाराय
णनारदसंवादे गणपतिखंडे विघ्नेशविघ्नसंप्रश्नो नामाष्टादशोऽध्यायः ॥ ॥१८॥ ॥नारायणदउवाच
॥किं स्तोत्रं कवचं ब्रह्म ब्रह्मणा च ददे मुने ताभ्यां पुरा दत्तं सूर्यस्य परमात्मनः किं वा पूजाविधानं वा को
मंत्रं व्याधिनाशनं सर्वं विस्मृतं महाभाग तन्मे त्वं वक्तुमर्हसि सूतउवाच नारदस्य वचः श्रुत्वा भगवान्करु
णानिधिः स्तोत्रं च कवचं मंत्रं सुधा च पूजनं कृतं नारायणउवाच शृणु नारद वक्ष्यामि श्रीसूर्यपूजनक्र ज
मं स्तोत्रं च कवचं सर्वं पापव्याधिसंस्मर तु स्तोत्रं शिवं मंत्रप्रदायकं ब्रह्मा गत्वा च वैकुंठं प्रपच्छ कमला
पतिं शिवं तत्रैव गच्छंतं वसंतं हरिसन्निधौ ब्रह्मोवाच मालिसुमालिनौ दैत्यौ व्याधिग्रस्तौ बभूवतुः ॥

किमुपायं वद ब्रह्मंस्तयोर्व्याधिविनाशने ॥ विष्णुरुवाच ॥ कृत्वा सूर्यस्य सेवां च पुष्करे पूर्णवत्सरं ॥ व्याधि श्रि
कुष्ठं महदं शाम्यतौ च मुक्तौ न विष्यति ॥ शंकर उवाच ॥ सूर्यस्य स्तोत्रं कवचं मंत्रकल्पतरुं परं ॥ देहि तात्स्यां ज
हं गत्कांत व्याधिं नुः महात्मनः ॥ श्रीवासं पत्रसदा तारौ सर्वदाता सुरश्रेष्ठयं ॥ विघ्नहर्ता दिनकरो यस्य योषितयो वि
धे ॥ तयोरनुमतिं प्राप्य ययौ दैत्यगृहं विधिः ॥ प्रणम्य तौ रष्टा च तस्मै ददतुरासनं ॥ तावुवाच स्वयं ब्रह्मा ग
स्था लितौ च दयानिधि ॥ सर्वाहाररहितौ पूर्वौ दुर्गंधिसंयुतौ ॥ ब्रह्मोवाच ॥ गृहीत्वा कवचं स्तोत्रं मंत्रं पूजावि
त धिक्रमं ॥ गत्वा हि पुष्करं वत्सौ पूजनीयः प्रणतौ रविं ॥ तावूचतुः ॥ भजामि केन विधिना केन मंत्रेण वा विधो ॥ दे
किं स्तोत्रं कवचं किं वा तदावाभ्यां प्रदेहि च ॥ ब्रह्मोवाच ॥ स्नात्वा त्रिकालं स्नानं च मंत्रेणानेन भास्करं ॥ संसेव्य
भास्करं भक्त्या निरुजौ च भविष्यथः ॥ ॐ ह्रीं नमो भगवते सूर्याय परमात्मने स्वाहेत्यनेन मंत्रेण साव ॥४८॥
धानं दिवाकरं ॥ संपूज्य भक्त्या दत्वा चैवोपचाराणि षोडश ॥ एवं संवत्सरं यावद्भक्तौ गुरुणा पूर्वं सिद्धिं प्राप्नुति

कथितं पुरुवदं ॥

पूर्वकं ॥ तत्सहस्रं गांगाय शापेन गौतमस्य च ॥ अहल्याहरणे वैव पापमुक्ताय संकटे ॥ रहस्यातिरूपा
च इंद्रस्य गुप्तवशामिक कवचं परमाद्भुतं ॥ यद्धृत्वा मुनयः पूताः जीवन्मुक्ताश्च नारदे ॥ कवचं बिभ्रतो व्याधिः
न याति सन्निधिं भीया ॥ यथा दृष्ट्वा वैनतेयं पलायंते भुजंगमाः ॥ शुद्धाय गुरुभक्ताय स्वशिष्याय प्रकाशयेत्
खलाय परशिष्याय दत्वा मृत्युमवाप्नुयात् ॥ जगद्विलक्षणस्यास्य कवचस्य प्रजापति ॥ ऋषिश्छंदोऽस्य गा
यत्री देवो दिनकरः स्वयं ॥ व्याधिप्रणाशे मोक्षे विनियोगः प्रकीर्तितः ॥ सद्यः फलकरं सारं सर्वपापप्रणा
शनं ॥ ॐ क्लीं ह्रीं श्रीं श्रीं सूर्याय स्वाहा मे पातु मस्तकं ॥ अष्टादशाक्षरो मंत्रः कपालं मे सदावतु ॥ ॐ ह्रीं क्लीं श्रीं
स्तु श्रीं सूर्याय स्वाहा मे चक्षुर्नासिकां ॥ चक्षुर्मे पातु सूर्यस्य स्त्रवारकांश्च विकर्तनः ॥ भास्करश्चोदरं पातु दंतं दि
नकरः सदा ॥ प्रचंडः पातु गंडं मे मार्तंडः कर्णमेव च ॥ मिहिरश्च सदा स्कंधं पातु जंघे च पूषणः ॥ वक्षः पातु रविः
शश्वन्नाभिं सूर्यः स्वयं सदा ॥ कंकालं मे सदा पातु सर्वदेव नमस्कृतः ॥ करौ पातु सदा ब्रध्न पादौ पातु प्रभा

कर। प्रभाकरो मे सर्वांगं पातु संततमीश्वरः। इति ते कथितं वत्स कवचं सुमनोहरं। जगद्विलक्षणं नाम
त्रिजगत्सु सुदुर्लभं। पुरा दत्तं च मनवे पुलस्त्येन पुष्करे मुदा मया दत्तं तुभ्यं च यस्मै कस्मै न दास्यसि। व्याधि
तो मुच्यते तेन कवचस्यास्य धारणात्। इदं कवचमज्ञात्वा यो मूढो भास्करं भजेत्। दशलक्षप्रजप्तोऽपि न मं
त्रः सिद्धिदायकः। इति श्रीब्रह्मवैवर्ते श्रीसूर्यकवचं। ब्रह्मोवाच। धत्स्वेदं कवचं वत्स कृत्वा च स्तवनं रवे यु
वां व्याधिर्मुक्तोऽसि निश्चितं च न विस्मयः। स्तवनं सामवेदोक्तं सूर्यस्य व्याधिमोचनं। सर्वपापहरं सारं श्री
आरोग्यकरं परं। ब्रह्मोवाच। त्वं ब्रह्म परमं धाम ज्योतीरूपं सनातनं। त्वामहं स्तोतुमिच्छामि भक्तानुग्रहकार स्तो
रं त्रिलोक्यलोचनं लोकनाथं पापविमोचनं। तपसां फलदातारं दुःखदं पापिनां सदा। कर्म्मानुरूपफ
लदं कर्म्मबीजं दयानिधिं। कर्म्मरूपं क्रियारूपं अरूपं कर्म्मबीजकं। ब्रह्माविष्णुमहेशानां नाम च त्रिगु ६८
णात्मकं। व्याधिदं व्याधिहंतारं शोकमोहभयापहं। सुखदं मोक्षदं सारं भक्तिदं सर्वकामदं। सर्वेश्वरं

सर्वरूपं साक्षिणं सर्वकर्मणां। प्रत्यक्षं सर्वलोकानां अप्रत्यक्षमनूहकं। शश्वद्रसहरं पश्चाद्रसदं सर्वसि
द्धिदं। सिद्धिस्वरूपं सिद्धेशं सिद्धानां परमं गुरुं। स्तवराजमिदं प्रोक्तं गुह्याद्गुह्यतमं परं। त्रिसंध्यं यः पठेन्नि
त्यं सर्वव्याधेः प्रमुच्यते। आन्ध्यं कुष्ठं च दारिद्र्यं रोगं शोकं भयं कलिः। तस्य नश्यति विप्रेंद्र श्रीसूर्यकृपया ध्रुवं
महाकुष्ठी च गलितो चक्षुर्हीनो महाव्रणी। यक्ष्मग्रस्तो महाशूली नानाव्याधियुतोऽपि वा। मासं कृत्वा हविष्या
न्नं श्रुत्वा समुच्यते ध्रुवं। स्नानं च सर्वतीर्थानां लभते नात्र संशयः। पुष्करं गच्छ यः शीघ्रं भास्करं भज यः सुतो
इत्येवमुक्त्वा सविधिर्जगाम स्वालयं मुदा। तौ निषेव्य दिनेशं तं नीरुजौ तौ बभूवतुः। इत्येवं कथितं वत्स कि ऊ ज
न्न्यच्छ्रोतुमिच्छसि। सर्वविघ्नहरं सारं विघ्नेशाविकारणं। स्तोत्रेणानेन तं स्तुत्वा मुच्यते नात्र संशयः॥ ॥इति
श्रीब्रह्मवैवर्ते महापुराणे गणपतिखंडे नारायणनारदसंवादे विघ्नकारणकथनं नामोनविंशतितमोऽध्याय
॥ ॥नारद उवाच॥ हरे रंशात्समुत्पन्नो हरितुल्यो महान् सुधीः। तेजसा विक्रमेणैव यन्मे शं तं श्रोतुमिच्छसि

विघ्ननिघ्नस्य यद्विघ्नं श्रुतं तत्परमाद्भुतं । तद्विघ्नकारणं चैव विघ्नकारणवकातः ॥ अधुना श्रोतुमिच्छामि श्रीमा
न्मंगलं देवभंजनं । त्रैलोक्यनाथतनये गजस्यायोजनाकथं ॥ स्थिते शास्येषु सर्वेषां जंतूनां जंतुसंभवः । वि
शिष्टानां स्वरूपेषु नानारूपेषु रूपिणां ॥ नारायण उवाच ॥ गजास्ययोजनं स्वकारणं शृणु नारद ॥
गोप्यं सर्वपुराणेषु वेदेषु च सुदुर्लभं । तारणं सर्वदुःखानां कारणं सर्वसंपदां । तारणं विपदां चैव रहस्यं
पापमोचनं ॥ महात्म्यमाश्चर्यतरं सर्वमंगलमंगलं ॥ सुखदं मोक्षदं चैव चतुर्वर्गफलप्रदं । शृणु तात प्रव
क्ष्यामि इतिहासं पुरातनं ॥ रहस्यं पाद्मकल्पस्य पुरातनमुखाच्छ्रुतं ॥ एकदा देवमहेंद्रः पुष्पभद्रानदी
यो महासुषमे दोन्मत्तकामराजश्रियान्वितः ॥ तत्तीरे निरहःस्थाने पुष्पोद्याने मनोहरे । अलावदु ॥ ५७ ॥
गमने रम्ये सर्वजंतुविवर्जिते ॥ भ्रमरध्वनिसंयुक्ते पुंस्कोकिलरुतश्रुते ॥ सुगंधिपुष्पसंश्लेषवायुना
सुरभीकृते ॥ ददर्श रंभां तत्रैव चंद्रलोकात्समागतां ॥ सुरतश्रमविश्रामकामुकीं कामकामुकीं । इष्ठ

तां मिसितां क्रीडां गच्छंतीं मदनाश्रमं । एकाकिनीं सुन्मनस्कां मन्मथोद्धतमानसां ॥ सुश्रोणीं सुंदरीं रूपा
मां बिंबाधरसरोरुहां ॥ हंस त्वं वारणे गजेंद्रमदगामिनीं ॥ सस्मितास्यशरच्चंद्रां सुंशाकटाक्षं चैव
बिभ्रतीं ॥ बिभ्रतीं कबरीं रम्यां मालतीमाल्यशोभितां ॥ वह्निशुद्धांशुकाधानां रत्नभूषणभूषितां ॥ क
स्तूरीबिंदुसंयुक्तसिंदूरबिंदुमंडितां । नीलोत्पलविनिंदैककज्जलोज्ज्वललोचनां ॥ मणिकुंडलयुग्मेन
रूपसुरम् गंडस्थलविराजितां । सुरतं दरसिकानां च बिभ्रतीं सर्वसौभाग्यवेशाढ्यां सुभगां सुरतोत्सुकां । प्राणाधि
कां च देवानां स्वच्छां स्वच्छंदगामिनीं ॥ वरामप्सरसां रम्यां मत्तवारस्थिरयौवनां । गुणरूपवतीश्रांतां मुनि
मानसमोहिनीं ॥ दृष्ट्वा तां मतिवेशाढ्यां तत्कटाक्षेणपीडितः । इंद्रो लीलाद्विपवरात् अवरुह्य उपचक्रमे ॥
इंद्र उवाच ॥ क्व गच्छसि वरारोहे क्व गतासि मनोहरे ॥ मया दृष्टासि सुचिरं अभिप्रायमतवाधुना तवान्वे
षणं कृतं हि त्वं श्रुत्वा चीत्कर्यं क्रांतः ॥ रम्भा तव त्वानुरक्तस्य कामेनांगणस्या मिथ्या सुवासितां जलार्थीयाः ॥ किं
कांतां च

बा न्य नंजलं पंकं नेछेचंदनार्थ्यपंकजार्थानुचोत्पलं सुधार्थानसुरामिछेत दुग्धार्थानजलंविलं सुगंधिपु
ष्पशायीयोनचास्त्रतृसुमिछति विहाय गंगां कोविज्ञोनदीमन्यांचवांछति इंद्रियेश्वद्विपलांवईमानाश्च
मेवनैः वरंभार्थ्यपितारश्चजीविनश्चसुखार्थिनः इत्येवमुक्त्वा भगवान्वरुध्यगजेश्वरात् भक्तियुक्तश्च
सुरतंतस्त्रीतस्याश्चनारद श्रुत्वालक्ष्चनंरंभाप्रहाश्रृंगारलोचनेलुपा जहासानम्रवदनापुलकां
लतः राजाकवचहीनोपिसपुत्रश्चपपातह पतितेतुसहस्राक्षेकार्तवीर्य्यार्जुनःस्वयं आजगाम

महावीरोद्दिलत्साहो हिरणीपुत्रः सुवर्णरथमारुह्यधरत्नसारपरीछदं । नानास्त्रंपरितःकृत्वालस्थौ
समरमूर्द्धनि । परशुरामश्चरमणेतंराजेंद्रंददर्शह । रत्नालंकारभूषाढ्यैः राजेंद्रकोटिभिः सह । र
त्नातपत्रभूषाध्यंरत्नालंकारभूषितं चंदनोक्षितसर्वांगंसस्मितंसुमनोहरं । राजादृष्ट्वामुनींद्रंतमव
रुह्यरथादहो । प्रणम्यरथमारुह्यतस्थौनृपगणैःसह । ददौशुभाशिषंतस्मैरामश्चसमयोचितां ।
प्रत्यवाधगलार्थंचस्वर्गंगछेतिसानुगः । उभयोसैवयोर्युद्धंबभूवतत्रनारद । पलायिताराममशिष्याश्चा
तरश्चमहाबलाः । क्षतविक्षतसर्वांगाः कार्त्तवीर्य्यप्रपीडिता । नृपस्मशाररजालेनरामःशस्त्रभृतांवरः ।
नददर्शस्वसैन्यंचराजसैन्यंस्वमेवच । चिक्षेपवह्निरामश्चवह्न्यस्त्रीमयंरणे । निवार्पयामासराजावा ९१
रुणेनविचक्षणः । चिक्षेपरामोगांधर्वंशैलंसर्पसमन्वितां । वायव्येनमहाराजःप्रेरयामासलील
या । चिक्षेपरामोनागास्त्रंदुर्निवार्य्यंभयंकरं । गारुडेनमहाराजःप्रेरयामासलीलया । माहेश्वरंच

भगवान्चिक्षेपभृगुनंदन । निवार्पयामासराजावैष्णवास्त्रेणलीलया । भृगुश्चिक्षेपब्रह्मास्त्रंनृप
नाशायनारद । ब्रह्मास्त्रेणाचभूपस्यप्रापनिर्वापणंरणे । दत्तदत्तंचयत्शूलमव्यर्थंमंत्रपूर्वकं । जग्राह
हराजासमरे परशुरामवधायच । शूलंददर्शनामश्चशतसूर्यसमप्रभं । प्रलयाग्निशिखोद्रिक्तंदुर्निवार्यं
सुरैरपि । पपातशूलंसमरेरामस्योपरिनारद । मूर्छामवापसभृगुःपपातचहरिंस्मरन् । पतितेपर्शुरा
मेचसर्वदेवाभयाःकुलाः । आजग्मुःसमरंतत्रब्रह्मविष्णुमहेश्वराः । शंकरश्चमहाज्ञानीमहाज्ञानेन
लीलया । ब्राह्मणंजीवयामासतूर्णंनारायणाज्ञया । भृगुश्चचेतनांप्राप्यददर्शपुरतःसुरान् । प्रणना
मपरंभक्त्यालज्जानम्रात्मकंधरः । प्रणम्यशिरसामूर्ध्नातुष्टावपरमेश्वरान् । तत्राजगामभगवान्द
त्तात्रेयोरणस्थलं । शिष्यरक्षानिमित्तेनकृपालुःभक्तवत्सलः । भृगुःपाशुपतास्त्रंचजग्राहयोगसंयुत
ल । दत्तदत्तेनदृष्टेनवभुवस्तंभितोरणे । ददर्शस्तम्भितोरामोराजानंरणमूर्द्धनि । नानार्षैर्षदयुक्तेनस्त

ह्येनरक्षितंरणे। सुदर्शनंप्रज्वलंतंभ्रमणंकुर्वत्सदा। सम्मिलितेनस्कंदेनैवब्रह्मविष्णुमहेश्वरः। गो
पालंश्रापुत्रकेनगोपदेशाविधायिना। नवीनजलदाभेनबंशीहस्तेननारद। एतस्मिन्नंतरेतत्रवाग्बभू
रा वाशरीरिणी। दत्तेनदत्तंकवचंकृष्णस्यकवचंयत। श्रुत्वाशरीरिणीवाणींशंकरोद्विजरूपधृक्। भिक्षांकृ
त्वातुकवचंमानीयचनृपस्यच। एतस्मिन्नंतरेदेवाजग्मुःस्वस्थानमुत्तमं। उवाचपर्शुरामश्चराजानंस
मरंप्रति। पर्शुरामउवाच। राजेंद्रोत्तिष्ठसमरंकुरुसाहसपूर्वकं। कालभेदेजयोनॄणांकालभेदेप
राजयः। अधीतंविधिवद्दत्तंकृत्वापृथ्वीचशासितायशः। कृतंचसंग्रामेत्वयामूर्छितोधुना। जितश्च
वैचराजेंद्रोलीलयारावणोजितः। जितोहंदत्तसूनैःस्तेनशंभुनाजीवितःपुनः। रामस्यवचनंश्रुत्वा ॥१०३॥
राजापरमधार्मिकः। मूर्ध्नाप्रणम्यतंभक्त्यायथार्थमिदमुवाचह। राजोवाच। किमधीतंचकिंदत्तंकावा
पृथ्वीसुशासिता। गताकतिविधानृपामादृशाधरणीतले। बुद्धिस्तेजोविक्रमश्चविविधारणामं

नाणां। श्रीरैश्वर्यंतथाज्ञानंदानशक्तिश्चलौकिकं। आचारोविनयोविद्याप्रतिष्ठापरमंतपः। सर्वमेतो
रमावत्गेगतमेमसंप्रति। साचलक्ष्मीप्राणतुल्यामेसाध्वीपद्मांशसंभवा। गेचपत्नीमात्रेवस्नेहेकोडन य
मंगतौ। कारणात्संगिनीशास्वतद्रायनेभोजनेरणे। तंविनाप्राणहीनोहंवाषहीनोयथारगः। तथान
ष्टंसुहृन्मेपुरेयंशोचनास्थिता। द्वितीयाशोचनाविप्रहतोयैहंब्राह्मणेनच। कालेसिंहःश्रृगालंचश्रृगा
लःसिंहमेवच। कालेव्याघ्रंनरोहंतिगजेंद्रंहरिणस्तथा। महाषंमत्तीकाकालेगरुडंचयथारगः। किंकरः
सोतिराजेंद्रंकालेराजाचकिंकरं। इंद्राश्चमनवश्चैवकालेकालेब्रह्मामरिष्यति। तिरोभूताचप्रकृतिःकाले
श्रीकृष्णविग्रहे। मरिष्यंतिसुराःसर्वेत्रैलोकस्थाश्चराचराः। सर्वेकालेलयंयांतिकोपिदुरतिक्रमः। काल
स्यकालःश्रीकृष्णःसृष्टस्रष्टायथेच्छया। संहर्त्ताचैवसंहर्तुःपातुपातापरात्परः। महास्थूलात्स्थूल
तमःसूक्ष्मात्सूक्ष्मतमःकृशः। परमाणुःपरमःकालःकालस्यकालभेदतः। यस्यलोमानिविश्वानिसप्तु

मांश्चमाहान्विराट् तेजसा षोडशांशश्च कृष्णस्य परमात्मनः ततः क्षुद्रविराड्जातः सर्वेषां कारणं
परं यः स्रष्टा च स्वयं ब्रह्मा यन्नाभिकमलोद्भवः नाभेः कमलदंडस्य योतं न प्राप यत्नतः भ्रमंश्च लक्षवर्
षं च ततः स्वस्थानसंस्थितः तपश्चकार ततस्तत्र लक्षवर्षं च वायुभक् ततो ददर्श गोलोकं श्रीकृष्णं च
सपार्षदं गोपगोपीपरीव्रतं द्विभुजं तं ग्रहीत्वा च प्रणम्य च पुनः पुनः ईश्वरेच्छां च विज्ञाय क्षुस्र
ष्टीमनोदधे मंचयः शिवः स्रष्टीसंहर्त्ता सच कृष्णस्य ललाटजः विष्णुः पाता क्षुद्रविराट् श्वेतद्वीपनिवासकृ
त् सृष्टिकारणभूताश्च ब्रह्मविष्णुमहेश्वराः संति विश्वेषु सर्वेषु श्रीकृष्णस्य कमलोद्भवाः तेच देवाः प्रा
कृतिकाः प्राकृतश्च महान्विराट् सर्वं च भूता प्रकृतिः श्रीकृष्णः प्रकृतेः परः न शक्तः परमेशोपि तां श
क्तिं प्रकृतिं विना सृष्टिं विधातुं मायेशो न स्रष्टा मायया विना साच कृष्णे तिरोभूता स्रष्टिसंहारका १०३
ले यैकेमाविर्भूता स्रष्टिकाले साचमात्या परमेश्वरः कुलालश्च घटं कर्त्तुं यथा शक्तो मृदं विना स्वर्णं

विना स्वर्णकारः कुंडलं कर्त्तुमक्षमः सा शक्तिः स्रष्टिकाले पंचधा चेश्वरेच्छया राधा पद्मा च सावित्री दुर्गा
देवी सरस्वती प्राणाधिष्ठातृया देवी कृष्णस्य परमात्मनः प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता
ऐश्वर्याधिष्ठातृदेवी या सर्वमंगलकारिणी परमानंदरूपा च सा लक्ष्मीः परिकीर्त्तिता विद्याधिष्ठातृया दे
वी परमेशस्य कृष्णजा वेदशास्त्रयोगमाता सा सावित्री परिकीर्त्तिता बुद्ध्याधिष्ठातृया देवी सर्वशक्तिस्वरू
पिणी सर्वज्ञानात्मिका सर्वा दुर्गा दुर्गतिनाशिनी रागाधिष्ठातृया देवी शास्त्रज्ञानप्रदा सदा कृष्णकंठो
द्भवा या च सा च देवी सरस्वती पंचधा देव्येयं देवी मूलप्रकृतिरीश्वरी ततः स्रष्टिक्रमेणैव बहुधा कलया
या च सा योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च मायया स्रष्टिकाले च तद्विना न त्वेवं भवः स्रष्टिश्च
प्रति विश्वे च ब्रह्मान्ब्रह्मोद्भवा सदा पाता विष्णुश्च संहर्त्ता शिवः शश्वत् शिवप्रदः इत्तं तत्त्वज्ञानमिदं
राममख्यं च पुष्करे दिक्षाकाले च मां[illegible]च मुनिप्रवरसन्निधौ इत्युक्ताकार्त्तवीर्यश्च श्रीरामं नत्वा च समि

ता। आरुरोहरथंशीघ्रंगृहीत्वासशरंधनुः। रामस्तत्रोराजसैन्यंब्रह्मास्त्रेणजघानह। नृपंपाशुपते
नैवलीलयाश्रीहरिंस्मरन्। एवंत्रिःसप्तकृत्वश्चक्रमेणचवसुंधरां। रामश्चापेवनिर्भूपांलीलया
चशिवंस्मरन्। गर्भस्थंमातृक्रोडस्थंशिशुंवृद्धंचमध्यमं। जघानक्षत्रियंरामः प्रतिज्ञापालनायवै
कार्त्तवीर्य्यश्चगोलोकंजगामकृष्णसंनिधिं। जगामपर्शुरामश्चस्वालयंश्रीहरिंस्मरन्। त्रिःसप्त
कृत्वोनिर्भूपांमहींदृष्ट्वामहेश्वरः। पर्शुनारामणंदृष्ट्वापर्शुरामंचकारतं। देवाश्चमुनयोदेव्याःसिद्धा
गंधर्वकिन्नराः सर्वेचक्रुःपुष्पवृष्टिराममूर्द्ध्निच। नारद। स्वर्गेदुंदुभयोनेदुर्हरिशब्दोबभूवह। परशुराम
स्ययशसाशुभ्रेणपूरितंजगत्। ब्रह्माभृगुश्चशुक्रश्चच्यवनोवाल्मिकिस्तथा। जमदग्निर्ब्रह्मलोका १०४
दाजगामप्रहर्षितः। पुलकांकितसर्वांगाआनंदाश्रुसमन्विताः। दूर्वापुष्पकराःसर्वेकुर्वंतोमंगला
शिषं। प्रणनामचताञ्रामोदंडवत्पतितोभुवि। क्रोडेचकारब्रह्मादीक्रमात्तानतिसंरुदन्। तमुवाच

सयप्रब्रह्मापर्शुरामंजगद्गुरुः। हितंनितंवेदसारंपरिणामसुखावहं। ब्रह्मोवाच। परशुरामप्रवक्ष्यामि
सर्वसिद्धिकरंपरं। कणशाखोक्तवचनंसत्यंचसर्वसम्मतं। पूज्यानामेवसर्वेषामिष्टःपूज्यतमःपरः।
जनकोजन्मदानात्पालनाच्चपिताश्रुतः। गरीयान्जन्मदातुश्चसोन्नदातापितामुने। विनान्नान्नश्वः
श्वरोदेहोननित्यंपितुरुद्भव। तयोःपरशुगणेमातापूज्यामान्याचवंदिता। गर्भधारणपोषाभ्यांसाच
ताभ्यांगरीयसी। तेभ्यस्तातगुणेपूज्योभीष्टदेवश्चतौश्रुतः। ज्ञानविद्यामंत्रदाताभीष्टदेवात्परोगुरुः। गु
रुवत्गुरुपुत्रश्चपगुरुपत्नीततोधिकादेवेरुष्टेगुरूरक्षेद्गुरौरुष्टेनकश्चन। गुरुर्ब्रह्मागुरुर्विष्णुर्गु
रुर्देवोमहेश्वरः। गुरुदेवपरंब्रह्मब्राह्मणेभ्यःप्रियःपरः। गुरुर्ज्ञानंददात्येवज्ञानंचहरिभक्तिदं
हरिभक्तिप्रदातायःकोवाबंधुस्ततःपरः। अज्ञानतिमिरांधश्चज्ञानपंथंनोलभेत्। त्रघात्वनिर्मलंप
रूपत्कोबापरेपवद्यस्ततःपरः। गुरुज्ञानंददात्येवंगुरुदत्तंमंत्रंचजस्वामंत्रंततोलभेत्। सर्वज्ञत्वंच

स्मिद्धित्वंकोवाबंधुस्ततोधिकः । सुखंजयतिसर्वत्रविद्ययागुरुदत्तया । मायापूज्योपिजगतिकोवाबंधु
स्ततोधिकः । विद्यांधोवाधनांधोवायोमुढोनभजेगुरुं । ब्रह्महत्यादिकंपापंलभतेनात्रसंशयः । दारिद्र्यंप
तितंलुब्धंनबुधावदंतेगुरुं । सोस्तुविसंधीयस्मात्तोपिनाधिकारीचकर्मणासु । अभीष्टदेवश्रीकृष्णोगुरुस्ते
शंकरस्स्वयं । शरणंगच्छहेपुत्रदेवात्पूज्यतमंगुरुं । त्रिःसप्तकृत्वानिर्भूयात्वयापृथ्वीकृतापुरा । प्राप्ता
चहंताहरेभक्तिस्त्वंशिवंशरणंव्रजः । शिवंतुशिवरूपंतंशिवदंशिवकारणं । शिवाराध्यंशिवंशांतंगुरु
त्वंशरणंव्रज । गोलोकनाथोभगवान्शोनमहत्वलाद्धजः । यदीष्टदेवःसुगुरुस्तमेवशरणंव्रज । आत्मा
रूपस्सःशिवोज्ञानंमनोहंसर्वजोविभु । प्राणाविष्णुश्चप्रकृतिसर्वशक्तियुतासुत । ज्ञानंदंज्ञानरूपंचज्ञान ।१०५।
बीजंसनातनं । मृत्युंजयंकालकालंतंगुरुंशरणंव्रज । ब्रह्मज्योतिःस्वरूपंतंभक्तानुग्रहकारकं । श
रणंव्रजसर्वज्ञंभगवंतंसनातनं । प्रकृतिलक्षवर्षंचतपस्त्वायमईश्वरं । कांतंप्रियपतिंलेभेतंगुरुंशरणं

व्रज । इत्युक्त्वामुनिभिःसार्द्धंजगामकमलोद्भव । रामश्चगंतुंकैकेयास्शंमनस्थकेचनारद ॥ ॥ इति
श्रीब्रह्मवैवर्तेमहापुराणेनारायणनारदसंवादेगणपतिखंडेचत्वारिंशत्तमोध्यायः ॥ ॥ नारायण
उवाच ॥ ॥ हरेश्चकवचंधृत्वास्तुत्वानिःक्षत्रियांमहीं । रामोजगामकैलासंनमस्कर्तुंशिवंगुरुं । गुरुपत्नीं
शिवांमांवांछगुरुंसुतोचतौ । गुरोगणेनारायणासमोकार्त्तिकेयगणेश्वरो । मनोयायीमहात्माचशी
घ्रंसत्याप्यतत्क्षणं । ददर्शनगरंरम्यंमत्तांस्तुमनोहरं । शुद्धस्फटिकसंकाशैर्मंदिरैःसुमनोहरैः । सु
वर्णमूल्यस्वदर्शैराजमार्गंविराजितं । सूनीपुराकारवर्णैश्चवेष्टितंमणिवेदिभिः । संयुक्तंमक्तानिलयैःप
रितोमणिमंडपैः । यत्नाणमालयोर्दिव्यैःसंयुतंशातकोटिभिः । कपाटस्तंभसोपानैःशोभितैर्मणिनिर्मि
तैःसुवर्णकलसैर्दिव्यैर्राजितैःश्वेतचामरैः । रत्नकांचनपूर्णैर्नयत्नेंद्रगणवेष्टितैः । रत्नभूषणभूषैश्च
दापैर्पितेःसुंदरागणैः । बालिकानिवालकैश्चचित्रपुत्तलिकारकैः । कीडद्भिःस्मितैः । शास्त्रस्वच्छंद

दृच विराजितैः पारिजातद्रुमगणैः स्वर्णदानिर्झरनाशकैः आकीर्णं पुष्पजालैश्च पुष्पितैश्च सुगं
धिभिः कल्पवृक्षाश्रितैः सिद्धैः कामधेनुपुरस्कृतैः सिद्धविद्याधिनियुतैः पुण्यवद्भिर्निषेवितं वरवृक्षैर
हयैश्च त्रिलक्षयोजनोच्छ्रकैः शतयोजनविस्तीर्णैः शतस्कंधसमन्वितैः असंख्यशाखानिकरैः रसंरब्धफ
लसंयुतैः नानापक्षिगणाकीर्णैः सुमनोहरशाखितैः कंपितैः शीतवातेन च सिद्धैः शालपल्लवैश्च युतं म
णिविकारजैः रामश्च दृष्ट्वा नगरमतीवहृष्टमानसः ददर्श पुरतो रम्यं स्वयुतं शंकराश्रयं सुवर्णमूल्यश
तकैर्म्मणिभिः स्वर्णवर्णकैः खचितं रत्नसारेण रचितं विश्वकर्म्मणा चतुर्योजनविस्तीर्णं त्रिपंचयोजना
च्छ्रितं चतुरस्रं चतुष्कोणं प्राकारं सुमनोहरं द्वारं रत्नकपाटेन नानाचित्रान्वितेन च युक्तं मनीन्द्र वेदीभि ।२०६।
र्मणिस्तंभविराजितैः नंदिं दक्षिणे वृषेंद्रस्य च वामे सिंहं च नारद नंदीश्वरं महाकालं पिंगलाक्षं महाभयं
करं विशालाक्षं च वामे द्वारे च विरूपाक्षं महाबलं विकटाक्षं भास्कराक्षं रक्ताक्षं विकटोज्वरं संहारभैर

वं कालं भैरवं च भयंकरं रुरुं भैरवमीशानं महाभैरवमेव च कुष्मांडभैरवं चैव क्रोधभैरवमुल्बणं
कपालभैरवं चैव रुद्रभैरवमेव च सिद्धांश्च रुद्रगणान् विद्याधरान् गुह्यकांस्तथा भूतान् प्रेता
न् पिशाचांश्च कूष्मांडान् ब्रह्मराक्षसान् वेतालान् दानवांश्चैव योगिन्द्रांश्च जटाधरान् पक्षान् किंपुरुषांश्च
व किन्नरांश्च ददर्श ह तान् दृष्ट्वा नंदिकेशांश्च जांबुवान्रघुनंदनः तान् संभाष्यांतरं च जगामानंद
मानसः रत्नेंद्रसारनिर्माणं ददर्शांतमंदिरं अमूल्यरत्नकलशैर्ज्वलद्भिश्च विराजितं अमूल्यरत्न
रचितैर्मुक्तानिर्मलदर्पणैः हीरसारविकारैश्च कपाटैश्च विराराजितं गोरोचनाभिर्मणिभिर्युक्तं स्तंभ
सहस्रकैः मणिसारविकारैश्च सोपानैः परिसेवितं अमूल्यरत्नरचितैर्ददर्शाभ्यंतरद्वारं नानाचित्रे
णचित्रितं मुक्तामाणिक्यग्रथितैर्माल्याजालैर्विराजितं ददर्श कार्तिकं वामे दक्षिणे च गणेश्वरं
वीरभद्रं महाकायं शिवतुल्यपराक्रमं प्रधानपार्षदगणान् क्षेत्रपालांश्च नारद रत्नसिंहासनस्थं

श्च रत्नभूषणभूषितान् ॥ तान्संभाष्य भृगुः शीघ्रं महाबलपराक्रमः ॥ परशुहस्तः परशुरामो ग
मनं कर्त्तुमुद्यतः ॥ तं गच्छंतं गणेशश्च क्षणं तिष्ठेत्युवाच ह ॥ निद्रितो निद्रया युक्तो महादेवोधुनेति-
च ॥ ईश्वराज्ञां गृहीत्वाहमत्रागस्य क्षणांतरे ॥ त्वया सार्द्धं गमिष्यामि भ्रातस्तिष्ठेति सांप्रतं ॥ श्रुत्वा गणे
गणेशवचनं परशुरामो महाबलः ॥ प्रहस्य तिष्ठ सोक्ता प्रवक्तुमुपचक्रमे ॥ ॥ इति श्रीब्रह्मवै
वर्त्ते महापुराणे गणपतिखंडे कैलाशवर्णनामैकचत्वारिंशोध्यायः ॥ ॥ परशुराम उवाच
॥ ॥ यास्याम्यतः पुरं भ्रातः प्रणामं कर्त्तुमीश्वरं ॥ प्रणम्य भ्रातरं भक्त्या यास्यामि त्वरितं गृहं ॥
त्रिःसप्तकृत्वो निर्भूपा कृता पृथ्वी च लीलया ॥ कार्त्तवीर्यः सुचंद्रश्च हतो यस्य प्रसादतः ॥ नानाविद्यो- ॥१०७॥
यतो लब्धा नानाशास्त्रं सुदुर्लभं ॥ तं गुरुं जगतां नाथं द्रष्टुमिच्छामि सांप्रतं ॥ सगुणं निर्गुणं चैव भक्तानु-
ग्रहविग्रहं ॥ सत्यं नित्यस्वरूपं च ब्रह्मज्योतिः सनातनं ॥ स्वेच्छामयं दयासिंधुं दीनबंधुं मुनीश्वरं ॥ स्वात्मा

रामं पूर्णकामं व्यक्ताव्यक्तं परात्परं ॥ आशुतोषं प्रसन्नास्यं शरणागतवत्सलं ॥ भक्ताभक्तप्रदं भक्तवत्सलं
समदर्शिनं ॥ परापराणां स्रष्टारं पुरुहूतं पुरुष्टुतं ॥ पुराणं परमात्मानमीशानमादिमव्ययं ॥ सर्वमंगल
मांगल्यं सर्वमांगल्यकारणं ॥ सर्वमंगलदं शांतं सर्वैश्वर्यप्रदं परं ॥ इत्युक्त्वा परशुरामश्च तस्थौ गणपतेः पु
रः ॥ वाचा मधुरया तत्र मुवाच स गणेश्वरः ॥ गणेश्वर उवाच ॥ क्षणं तिष्ठ क्षणं तिष्ठ शृणु भ्रातरिदं वच ॥ रहः-
स्थलनियुक्तश्च न दृष्टः स्त्रीयुतः पुमान् ॥ स्त्रीसंसक्तं च पुरुषं यः पश्यति नराधमः ॥ करोति रमणं गं वा काल
सूत्रं व्रजे ध्रुवं ॥ तत्र तिष्ठति पापी यावच्चंद्रदिवाकरौ ॥ विशेषतश्च पितरं गुरुं वा नृपतिं द्विजं ॥ रहः
स्तुतिसंयुक्तं न हि पश्येद्विचक्षणः ॥ कामतः कोपतो वापि यः पश्येत्सुरोत्सुरं ॥ स्त्रीविच्छेदो भवेत्तस्य ध्रु-
वं सप्तसु जन्मसु ॥ श्रोणीवक्षःस्थलं वक्त्रं यः पश्यति परस्त्रियाः ॥ कामतोपि विमुढश्च पंडो भवति निश्चितं
गणेशस्य वचः श्रुत्वा प्रहस्य भृगुनंदनः ॥ तमुवाच महाकोपात्त्रि तुच्छं वचनं मुने ॥ परशुराम उवाच ॥ अहो

श्रुतंकिंवचनंमत्पूर्वंनीलमुत्तमं । इदमेववचनयंनैवंश्रुतमीश्वरवक्रता । श्रुतंश्रुतौवाक्यमिदंकामि
नांचविकारिणांनिर्विकारस्यचशिशोनरोषंकश्चिदेवहि । यास्याम्यंतःपुरंत्वालस्तवकिंतिष्ठबालक । यथा
दृष्टंकरिष्यामिकार्यंचसमयोचितं । लवैवलालोमातावत्वयामासेनिरूपितं । जगतांपितरौतौचपार्वती
परमेश्वरौ । पार्वतीस्त्रीपुमान्शंभुरितिकेनंनिरूपित । सर्वरूपःशंकरश्चसर्वरूपाचपार्वती । गुणा
तीतास्यवाक्रीडालज्जागोवाकुलोविभो । क्रीडालज्जाप्नोतिनंगोग्रामस्यनेश्वरस्यच । स्तनांधंबालकंदृष्ट्वा
पित्रलज्जाकुलोभवेत् । लज्जायाश्चकुलोलज्जालज्जेशस्यवावाकुत । लज्जालज्जामवाप्नोतितापं
किंवाकुलाशान । शीतशीतमहोविप्रनिदाघोदाहमेवच । भातिभातिमवाप्नोतिमृत्युमृत्योविभेतिकं ॥ ॥१०८॥
कुतोज्वरंज्वरोहंताव्याधिव्याधिश्चजीर्यति । संहर्तारंचसंहर्ताकालःकालाद्विभेतिच । सृष्टास्रजति
स्रष्टारंपालास्वंपातित्वन्मतं । हंतहंतमवाप्नोतिदृष्टादृष्टांप्रयातिकिं । निद्रानिद्रांचश्रीःशोभांशां

तिःशांतिचत्वन्मतं । पुष्टिःपुष्टिमवाप्नोतितुष्टिस्तुष्टिर्दमात्मना । आत्मनःपरमात्मास्तिशक्तिशक्तिविभेति
च । क्षोभनमोहकामक्रोधाःस्वात्मानानहिबाधिता । दयानवदादययानेनेच्छावदेच्छयाप्रभो । ज्ञानबुद्ध्योःको
विकारोज्वरंमाबाधतेज्वरः । चिंतयाग्रस्ताचत्तुःस्वंचनपश्यति । हर्षमुदंकिंप्राप्नोतिःशोकंशोकोनबाधते
काविप्तिविते श्वसंपत्तिःसंपत्तेःकुतः । मेधायाधारणाशक्तिःस्मृतिर्वास्मरणंकुतः । नदग्धःस्वप्रतापेनवि
वस्मानितिसत्स्मृतः । विपरीतेर्मतोभ्रांतस्त्वयैवचरिताधुना । नश्रुतोयंगुरुमुखान्नदृष्टश्रुतोस्कतः ॥
इत्युक्त्वापर्शुरामश्चप्रहस्यचपुनःपुनः । शीघ्रंगंतुंमनश्चक्रेगुरोरभ्यंतरंमुदा । पर्शुरामवचःश्रुत्वाजितक्रो
धोगणेश्वरः । शुद्धसत्वस्वरूपश्चप्रहस्यतमुवाचह । गणपतिरुवाच । अज्ञानतिमिरांध्रोज्ञानंप्राप्नोति
ज्ञानिनः । पितुर्भ्रातुर्गुरुर्वाज्ञानंदुर्लभंनाणवानरभेत् । अतंज्ञानविशिष्टंचज्ञानिनामपिदुर्लभं । किंचि
त्ममंदबुद्धेश्शृणुत्वात निवेदनं । योनिर्गुणःसनिर्लिप्तःशक्तिस्योनहिंसायुतः । निमस्तुगणाश्रितःशक्तोनि

गुणः सगुणोभवेत् ॥ यावंती शरीराणि मार्गणानि महामुने प्राकृतानि च सर्वाणि श्रीकृष्णविग्रहं विना ॥
ध्यायंति योगिनस्तं च शुद्धज्योतिःस्वरूपिणं हस्तपादादिरहितं निर्गुणं प्रकृतेः परं वैष्णवास्तं न मन्यंते त
द्भक्ताः सूक्ष्मदर्शिनः ॥ कुतो बभूव ज्योतिरहो तेजस्विनां विना ज्योतिरभ्यंतरे नित्यं शरीरं श्यामसुंदरं द्विभु
जं मुरलीहस्तं सस्मितं पीतवाससं ॥ गोपीगोपैःपरीतं रत्नभूषणेनविभूषितं एवं भक्ताश्च ध्यायंते शश्व
त्चरणसेविनः ॥ योगिनो योगरूपं च कालेन परिपाकतः ज्योतिरभ्यंतरे मूर्तिं पश्यंति कृपया प्रभो ॥
तदा दास्ये नियुक्तास्ते न वांछंति वरेच्छया ॥ योगस्तपो वा दास्यस्य कलां नार्हति षोडशीं ॥ यदा स्रष्टुं सुखं कृ
ष्णः ससृजे प्रकृतिं मुदा तस्यां चाधाय वीर्यं वीर्याधानं बभूव मुने दिव्येन लक्षवर्षेण गर्भाड्डिंभो विनिर्गतः १०८
तदा च कारनिःश्वासं ततो वायुर्बभूव ह निःश्वासेन समं जातं मुखं बिंदु विनिर्गतं ततो बभूव सहसा जल
राशीहरेः पुनः तज्जले च स्थितो डिंभो दिव्यं च लक्षवर्षकं ततो बभूव सहसा विश्वाधारो महान् विराट्

यावंति गात्रलोमानि तस्य संति महात्मनः ब्रह्मांडानि च तावंति विद्यमानानि निश्चितं तत्रैव प्रतिब्र
ह्मांडे ब्रह्मविष्णुमहेश्वराः देवा नराश्च मुनयो विद्यमानाश्चराचराः ममहद्विराडश्च सर्वस्य च जनस्य च
निःश्वासवायुर्भगवान् बभूव श्रीहरेर्मुने महद्विष्णुश्च कलया ततः क्षुद्रविराड्भूत् तन्नाभिकमले ब्रह्मा
शंकरस्य ललाटजः विष्णुस्तद्देशो पालनाय श्वेतद्वीपनिवासकृत् एवं ते प्रतिब्रह्मांडे ब्रह्मविष्णुमहेश्वराः
स्वयं च स्वांशकलया नानामूर्तिधरो हरिः तदा च ब्रह्म सगुणः सर्वशक्तियुतः सदा कथं लज्जादिरहितः स च
वेच्छामयो महान् सर्वदा सर्वगो लागार्हः सर्वशक्तिसमन्वितः लज्जा नास्ति च लज्जायामतोयं सर्वसम्मतः
सा च लज्जावती देवी तस्या लज्जा कुतो गता सर्वशक्तिमती दुर्गा प्रकृतिः संज्ञा च ईशलज्जा तस्या लज्जादयः सं
ति सर्वदा सर्वसम्मता पंचधा मां च प्रकृतिः श्रीकृष्णस्य बभूव ह राधा पद्मा च सावित्री दुर्गा देवी सरस्वती
प्राणाधिष्ठातृदेवी कृष्णस्य परमात्मनः प्राणाधिका प्रिया सा च राधास्ति तस्य वक्षसि विद्याधिष्ठातृ

यादेवीसाविनिब्रह्मणः प्रिया। पत्नीर्नारायणस्यैवसर्वसंपत्स्वरूपिणी। सरस्वतीद्विधाभूताकृष्णस्य
मुखनिर्गता। भारतीब्रह्मणः कांतास्वयंनारायणस्यच। बुद्ध्याधिष्ठातृयादेवीज्ञानसूःशक्तिसंयुता
सादुर्गाशूलिनःकांतातस्यालज्जाकुलोगताः प्रकृतिःपंचधाभूतागोलोकेचवभूवह। इमाःप्रधानाः
कलयावभूवानेकधापिसा। विप्रेंद्रनित्यंवैकुंठंब्रह्मांडात्परमुच्यते। अविनाशिस्थलंशश्वत्तल्लयेप्रा
कृतिकेध्रुवं। तत्रनारायणोदेवःकृष्णार्द्धेचशश्वच्चतुर्भुजः वनमालीपीतवासाःशांत्याचपद्मयास
ह। स्वयंकृष्णश्चगोलोकेद्विभुजःश्यामसुंदरः। सस्मितोमुरलीहस्तोराधावक्षःस्थलस्थितः। गोगोप
गोपीभिःशश्वत्संयुक्तोगोपरूपधृक्। परिपूर्णतमःश्रीमान्निर्गुणःप्रकृतेःपरः। स्वेच्छामयः ११०
स्वतंत्रस्तुपरमानंदरूपधृक्। सुराःकलोद्भवास्यषोडशांशोमहान्विराट्। एतेभवंतिविनिस्थूलसु
क्ष्मादिकानिच। पुनस्तत्रप्रलीयंतेएवमेवमुहुर्मुहुः। गोलोकऊर्द्धवैकुंठात्पंचाशत्कोटियोजनेना

स्तीलोकस्त्वहूर्द्धंचनास्तितस्मात्परःप्रभुः। इदंश्रुतंशंभुवक्त्रादेहेहृष्टंबुधालकृतं। ज्ञानंनिशाधुनाभ्रात
रीश्वरःसुरतोमुखः॥ इतिश्रीब्रह्मवैवर्त्तेमहापुराणेगणपतिखंडेपर्शुरामगणपतिसंवादेज्ञान
निरूपणंनामद्विचत्वारिंशोध्यायः॥ नारायणउवाच। गणेशवचनंश्रुत्वामदावेगतसुधी
पर्शुहस्तःपर्शुरामोनिर्भयोगंतुमुद्यतः। गणेशरक्षतंदृष्ट्वाशीघ्रमुत्थायपत्नतः। वारयामाससंभाष्याव
ग कारविधिंपुनः। बहूनिचवचनस्तत्रवाग्युद्धंहस्तकर्षणं। पर्शुनिक्षेपणंकर्तुंमनश्चक्रेभृगुस्तदा। हाहाकृ
त्वाकार्तिकेयोबोधयामाससंसदि। अवध्यमस्त्रंहेभ्रातर्गुरुपुत्रंकथंक्षिपः। गुरुवद्गुरुपुत्रंचमानवान्
हंतुमर्हसि। पर्शुक्षेपयितुंक्रुद्धंरक्तपद्मदलेक्षणं। गणेशोबोधयामासनिवर्त्तस्वेतुवाचह। पुनर्गणेशं
रामश्चप्रेरयामासकोत्तमः। पपातदुरतोवेगात्तच्छिन्नमानेभजाननः। गजाननंसमुत्थाप्यधर्मंकृत्वा
तुसाह्निरणं। पुनस्तंबोधयामासज्ञितःक्रोधशिवात्मजः। निवर्त्तस्वनिवर्त्तस्वेत्युत्थायपुनःपुनः। प्र

वेदाने मेकारा किंराश्वराज्ञां विनाप्रभो मम न्यातातदपि मितिधिर्विधास्सं वधताध्रुवं ईश्वर धिपशि
षस्य समाहामि नेतुं महेतुना तस्य हंकार्यवार्य्यस्य मूपास्ते दंडं तत्तवः अयेविप्रनजानासि मां च विश्व
स्रष्टारमजं क्षणं तिष्ट निवर्त्तस्व मम येत्राह्मणा तिथि क्षणांतरे त्वरित्वया सार्द्धं यास्यामीश्वर सन्नि
धिं नारायण उवाच हरेर्वचनं श्रुत्वा प्रजहास पुनः पुनः पद्मांहिसुमनश्च क्रे प्रणम्य शंकरं हरि
पर्शुह्लिपंतं कोपनपरशुरामं जनन्तः दृष्ट्वा मुमूर्च्छुर्देवेशं धर्मं कृत्वा तुसाहिरां चकार हस्तं योगेन स
हस्रकोटियोजनं योगिन्द्र स्तत्र संतिष्टन् भ्रामयित्वा पुनः पुनः शांतथा वेष्टयित्वा तु भ्रामयित्वा तु तत्र
वै ऊर्द्ध्वमुत्तोलयवेगेन हृष्ट हिंगरुडोयथा सप्तद्विपांश्च शैलांश्च कांचनीं सप्त सागरान् दक्षिणे दर्श ॥ ११४॥
यामास रामं योगेन स्तंभितं हस्तपादाघना परं जाड्यं सर्वांगं कंपितं पुनस्तं भ्रामयामास दर्पितं द
र्पनाशनः भुवर्लोकं च भुवोलोकं स्वर्लोकं च सुरेश्वरः जनलोकं तपोलोकं दर्शयामास लिल्या

सत्यलोकं ब्रह्मलोकं ध्रुवलोकं च तत्परं गौरीलोकं शांभुलोकं दर्शयामास नारद दर्शयित्वा तु ब्रह्मां
डं मपयोस प्तसागरान् पुनरूर्द्ध्वं रणं चक्रे सन क्रुसागरोदकं तत्र तं पाययामास गंभीरे सागरोदके
मुमुर्षुं संतरंतं न पुनर्जहा ग्राहलीलया पुनस्तत्र भ्रामयित्वा ब्रह्मांडाद्र्ध्वमुत्तमं वैकुंठं दर्शयामास स
त्स्मितं जनार्दनं क्षणं तत्र भ्रामयित्वा योगीन्द्रो योगमायया पुनः करं च योगेन वद्धयामास लीलया गोलो
कं दर्शयामास विरजां च दीश्वरः वृंदावनं शातश्रृंगंचै वेदं रासमंडलं गोगोपगोपिभिः सार्द्धं श्रीकृष्णं
श्यामसुंदरं द्विभुजं मुरलीहस्तं सस्मितं सुमनोहरं रत्नसिंहासनस्थं च रत्नभूषणभूषितं तेजसा
सा कोटि सूर्याभं राधावक्षःस्थलस्थितं एवं कृष्णं दर्शयित्वा प्रणमय्य पुनः पुनः दृष्टा कं कृष्णमि
ष्टदेवं सर्वपापप्रणाशनं ब्रह्महत्यादिकं पापं भृगोरिंबभूव ह नमे वेध्यातनानष्ट विनाशो गेनषा
पजा स्वात्मानं तु भुजे शामो गत्या मत्कृष्णदर्शनात् क्षणेन चेतनां प्राप्य प पात वेगतो भुवि भुभुव

दुरीभूतं च गणेशं स्तंभनं नेत्रगो। सस्मार कवचं स्तोत्रं गुरुदत्तं सुदुर्लभं। अभीष्टदेवं श्रीकृष्णं गुरु(
रां तुंजराकुरुं। विलोपय पर्शुं वंमयं शिवतुल्यं च तेजसा। प्रीभ्रम ध्याकृमाऽर्जुड प्रसाद। लगुणां मुने
पितुर्नैरव्यर्थमस्त्रं च ददृशो गणपतिः स्वयं जग्राह रामतीन दन्तेनास्त्रं व्यर्थं चकार ह। निपत्य पर्शु
वेगेन छित्वा दन्तं समूलकं जगाम रामहस्तं च महादेववरेण च। हाहेति शब्दमाकाशे देवाश्च कुर्म(
र्हभिया। वीरभद्रश्च कार्त्तिकेय यं क्षेत्रपालाश्च पार्षदाः। पपात भूमौ दंतश्च रक्तः शब्दमुच्चरन्। यथा गै
रिकयुक्तश्च महास्फाटिकपर्वतः शब्देन महता विप्र चकंपे पृथ्वी विभिया। कैलासस्थजनानां सर्वे मूर्छा
मापुः क्षणं भिया। निद्रावन्तं च तनिद्राया निद्रेशस्य जगत्प्रभो। आजगाम बहिः शंभुः पार्वत्या सह ।।११३।।
संभ्रमात्। पुरो ददर्श हेरंबं लोहिताख्यं ज्वलनलं। भग्नदंतं जितक्रोधं सस्मितं लज्जितं मुने। पप्रच्छ
पार्वती शीघ्रं स्कंधं किमिति पुत्रकं। सचलां कथयामास वार्त्तां पौर्वापरीं भिया। चुकोप दुर्गा कृपया रु(

रोद च मुहुर्मुहुः। उवाच शंभोः पुरतः पुत्रं कृत्वा स्ववक्षसि। संबोध्य शंभुं शोकेन भिया विनयपूर्वकं उ
वाच प्रणता साध्वी प्रणतार्त्तिहरी पति। इति श्रीब्रह्मवैवर्त्ते महापुराणे गणपतिखंडे गणेशभ्रात
भग्नो नाम त्रिचत्वारिंशोध्यायः। पार्वत्युवाच। सर्वे जानंति जगति दुर्गाशाकरकिंकरी। अपेक्षार
क्षिता दासिस्याश्च जीवनं च यथा। ईश्वरस्य समाः सर्वास्त्वं गणपर्वतलजालय। हासि पुत्रस्य शिष्यस्य दोषदृ
तिस्समप्रभो। विचारं कर्त्तुमुचितं त्वं च धर्मविदां वरः। वीरभद्रकार्त्तिकेय पार्षदास्संति साक्षिणः। साक्षे मिथ्या
क्रोधवदेवत्वाद्वा विषाभ्रात्यौ समौ। साक्षेय मौश शत्रुमित्रौ सताधर्मनिरूपणे। साक्षी मनायं यत्साक्ष्यं ज
नेनोपन्यथा वदेत्। कामतः क्रोधतो वापि लोभेन च भयेन वा। स याति कुंभीपाकं च निपात्य शतपू
र्वकं। तेश्च साई वसेत्तत्र यावच्चंद्रदिवाकरौ। अहं विबोधितुं शक्ता निनेत्री च द्वयोरपि तथापि तव सा
तुममाज्ञा निदिता श्रुतौ। किं कारणं प्रभाकुत्र नृपे सति संसदि। उदिते भास्करे पृथ्वी स्वद्योताहीयथा।

प्रभो सुचिरं तपसा प्राप्तं त्वदीयं चरणांबुजं ॥ परित्याज्य तपेनैव वसंतं भीतया मया ॥ पतिश्चितको पत्नो
काभ्यां सुतकं मोहेन तत्परं ॥ तत्वत्तमस्य जगन्नाथ पुत्रस्नेहं च दारुणं ॥ तथा यदि परित्यक्ता तदा पुत्र
शतेन किं साध्या ॥ सदंशजा याश्च शत पुत्राधिकं पतिं ॥ असदंशप्रसूता या दुःशीला ज्ञानवर्जिता ॥ स्वा
मिनं मन्यते नासौ पित्रोर्दोषेण कुत्सिता ॥ कुत्सितं पतितं मूढं दरिद्रं रोगिनं जडं ॥ कुलजा विष्णुतुल्यं च का
तं पश्यति संततं ॥ हुताशनो वा सूर्यो वा सर्वतेजस्विनां परः ॥ पतिव्रतातेजसश्च कलां नार्हति षोडशीं ॥ म
हादानानि पुण्यानि व्रतान्यनशनानि च ॥ तपांसि पतिसेवायाः कलां नार्हंति षोडशीं ॥ पुत्रो वा पि पिता वा
पि बांधवो वा हो हरः ॥ योषितां कुलजानां तानां न कश्चित्स्वामिनः समः ॥ इत्युक्त्वा स्वामिनं दुर्गा ददर्श पुर ॥१२५॥
तो भृगुं ॥ शंभोः पादाब्जसेवं तं निर्नयं तमुवाच ह ॥ पार्वत्युवाच ॥ अये राम महाभाग ब्रह्मवंशोसि पंडित
पुत्रोसि जमदग्नेश्च शिष्योस्य योगिनां गुरोः ॥ माता रेतिरेणुका साध्वी पद्मांशा सत्कुलोद्भवा ॥ माता मह

वैष्णवश्च मातुलस्य श्च ततोधिकः ॥ त्वं वरेणुंकभूपस्य मनुवंशोद्भवस्य च ॥ दौहित्री मातुलः साधुः शूरो वि
ष्णुपरायणः ॥ कस्य दोषेण दुर्द्धर्षस्त्वं न जाने इमो सुतो ॥ येषां दोषैर्जनो दुष्टस्तवते शुद्धमानसा ॥ अमोघं
प्राप्य परशुं च गुरोश्च करुणानिधेः ॥ परिक्षात्रियं कृत्वा पूर्वं तत्सुतेपुनः ॥ गुरुवे दक्षिणां दातुं पृथ्वीं च सुतो
म सुतौ ॥ न भोदं तस्मात्सुतस्य छेदयस्व सुमकं ॥ गणेश्वरं रणे जित्वास्थित श्चेदावयोः पुरः ॥ आस्मां तथा वरेण
चहं तु शाः स्रगालश्च सिंहं शार्दूलमाखुं मृत्कु त्वद्विधं लक्षकोटिं च क्षुद्रं तुं शक्तो गणेश्वरः ॥ जितेंद्रियाणां प्रवरो
नहि हंति च मक्षिकां ॥ तेजसा कृष्णतुल्योयं कृष्णांशश्च गणेश्वरः ॥ देवाश्चान्ये तस्य कलाः पूजास्य पुर
तस्तत ॥ ब्रलः प्रभावतः शासः शंकरस्य वरेण च ॥ शोकेनाति कठोरेण न हि संपदि नो ॥ इत्युक्त्वा पार्वती रो
षात्तं रामं शाप्तुमुद्यता ॥ रामः सस्मार तं कृष्णं प्रणम्य मनसा गुरुं ॥ एतस्मिन्नंतरे दुर्गा ददर्श पुरतो
द्विजं ॥ अतीव वामनं बालं सूर्यकोटिसमप्रभं ॥ शुक्लदंतं शुक्लवस्त्रं शुक्लयज्ञोपवीतकं ॥ दंडिनं छ

त्रिणंचैवदधतंतिलकोज्वलं दधतंकुलक्ष्मीमालांमल्लिकंसुमनोहरं रत्नकेयूरवलयरत्नमालाविभू
षितं रत्ननूपुरपादंचसद्रत्नमुकुटोज्वलं रत्नकुंडलयुग्मेनगंडस्थलविराजितं स्थिरमुद्रांशंदधत
लंकरंकोवामकरेणच दक्षिणेनायमुद्रांचनक्षेशंनक्रवक्त्रकं बालिकाबालकगणैर्नागरैः समन्वि
तेयुतं केशवाश्रिमिःसर्वैराच्छन्नंवाह्निंतुमुदा तंदृष्ट्वासन्नमालत्वंमुंसह नृत्यःसपुत्रकः मूर्द्धामला
प्रणनामदुर्गविदंडवद्भुवि आमिषंप्रददौबालःसर्वेभ्योवांछितप्रदः तंदृष्ट्वाबालकाःसर्वेमला(
स्वर्यपपुर्जिया। दत्वालक्ष्मीशिवोनत्वाचोपचाराणिषोडश। पूजांचकार्[illegible]प्रत्युत्कांपरिपूर्णतम
स्यच कुंभश्रीकाएवत्वारकोतंत्रस्तोत्रेणनलकंधरः पुलकांकितसर्वांगोतंनवतंसनातनं रत्नसिं ॥ ११४ ॥
हासनस्थंचमुवाचशंकरस्वयं अतीवलज्जमासर्वंप्रच्छत्रीललमेवच शंकरउवाच आत्मारामेषुकु
शलप्रश्नोनीवविडंबनं तेशाश्वतकुलाधाराकुंलाः कुत्तालामिकाः आद्यमेसफलंजीवातंचसुजी
श चैव

वितं प्रारास्वमितिथिब्राह्मनस्त्वसमेवाफलोदयात् परिपूर्णतमः कस्मोलोकनिस्तारहेतवे कल्पपादु
णपास्तेत्रेचनारतेचल्पानिधि अतिथिःपूजितोयेनपूजिताःसर्वदेवताः अतिथिर्यस्यसंतुष्टोतस्यतु
ष्टोहरिःस्वयं स्नानेनसर्वतीर्थानांसर्वदानेनयत्फलं सर्वव्रतोपवासाभ्यांसर्वयज्ञेषुदाक्षया सर्वे
स्तपोनिर्दिविधेनित्यंनैमित्तिकादिभक्तिः देवतातिथिसेवायाःकलांनार्हतिषोडशीं सोतिथिर्यस्यन(
ती यासशोयातिरुष्टश्चमंदिरात् कोटिजन्मार्जितंपुण्यंतस्यनश्यतिनिश्चितं स्त्रीगोघ्नश्चकृतघ्नश्चब्र
ह्मघ्नोगुरुतल्पगः पितृमातृगुरूणांचनिंदकोनरघातकः संध्याहीनोऽश्वघातीससत्यभोहरिनिंद
कः ब्रह्मस्वस्थाप्यहारीचमिथ्यासाक्ष्यप्रदायकः मित्रद्रोहीकृतघ्नश्चवृषवाहश्चसुपकृत् शवदाही
ग्रामयाजीब्राह्मणोवृषलीपतिः शूद्रश्राद्धान्नभोजीचशूद्रश्राद्धेचभोजकः कन्याविक्रयकारीचश्रीह
रेर्नामविक्रयी लाक्षामांसलोहरसतिलानांचलवणस्यच विक्रेताब्राह्मणश्चैवतुरगाणांगवांतथा

एकादशीकृष्णसेवाहीनेवीरश्चमारते । एतेमहापातकिनस्त्रिषुलोकेषुनिंदिताः । कालसूत्रेचनरके (
पचंतीब्रह्मणःशतं । एतेभ्योप्यधममसोपियस्मातिथिपराङ्मुखः । नारायणउवाच । शंकरस्यवचः
श्रुत्वासंतुष्टःश्रीहरिस्वयं । मेघगंभीरयावाचातमुवाचजगत्पति । विष्णुरुवाच । श्वेतद्वीपादागतोहंज्ञा
त्वाकोलाहलंचवः । परशुरामस्यरक्षार्थंकृष्णकृस्यसांप्रतं । नैतेषांविष्णुभक्तानामशुभंविद्यतेक्वचित्
रक्षामितांश्चक्रहस्तोगुरुमन्योविनाशिव । नाहंपातागुरौरुष्टेवलवत्कर्महेलनं । तत्परंपातकोनास्तिसे
वाहीनोस्तुगुरोश्चय । मान्यःपूज्यश्चसर्वेभ्यसर्वेषांजनकोभवेत् । अहोयस्यप्रसादेनसर्वान्पश्य
तिमानव । जनकोजन्मदानाचरक्षणाच्चपितानृणां । ततोविस्तीर्णकरणात्कलयासप्रजापतिः । ।।११५।।
पितुःशतगुणैर्मातापोषणाद्गर्भधारणात् । वंद्यापूज्याचमान्याचप्रसूःस्त्रपावसुंधरा । मातुःश
तगुणैर्वंद्यःपूज्योमान्योन्नदायकः । यद्विनानश्वरोदेहोविष्णुश्चकलयान्नदः । अन्नदातुःशतगु

णोभीष्टदेवःपरःस्मृतः । गुरुस्तस्माच्छतगुणोभीष्टदेवःपरःस्मृतः । गुरुस्तस्माच्छतगुणोविद्यामंत्र
प्रदायकः । अज्ञानतिमिरांधस्यज्ञानदीपेनचक्षुषा । यःसर्वार्थंदर्शयतितत्परकोपिबांधव । गुरुदत्तेन
मंत्रेणतपसेष्टसुरंलभेत् । सर्वज्ञत्वंसर्वसिद्धितत्परःकोपिबांधवः । सर्वंजयतिसर्वत्रविद्ययागुरुदत्त(
या । यस्मात्पूज्योहिजगतिकोवाबंधुस्ततोधिकः । विद्यांधोवाधनांधोवायोमूढोनभजेद्गुरुं । ब्रह्महत्यादि
भिःपापैःसलिप्तोनात्रसंशयः । दरिद्रंपतितंक्षुद्रंनरबुद्ध्याचरेद्गुरुं । सोशुचितीर्थस्नातोपिनाधिकारीचक
र्मसु । पितरंमातरंभार्य्यांगुरुपत्नींगुरुंपरं । योनपुष्णातिकापट्यात्समहापातकीशिव । गुरुर्ब्रह्मागुरुर्वि
ष्णुर्गुरुर्देवोमहेश्वरः । गुरुरेवपरंब्रह्मगुरुर्भास्कररूपधृक् । गुरुश्चंद्रस्तथेंद्रश्चवायुश्चवरुणोनलः ।
सर्वरूपोहिभगवान्परमात्मास्वयंगुरुः । नास्तिवेदात्परंशास्त्रंनहिकृष्णात्परंसुरं । नास्तिगंगासमंती
र्थनपुष्पंतुलसीपरं । क्षमावतीभूपरानपुत्रात्त्रास्तपरःप्रियः । नचदेवात्परःशक्तोव्रतंनैकादशीविना

शालग्रामश्च परेयत्तो नस्ते त्रंयारलातत्परं। परं पुण्यस्थलानां च पुण्यं वृंदावनं यथा। मोक्षदानां यथा
काशी वैष्णवानां यथा शिवः। न पार्वतीसमा साध्वी न गणेशात्परो वशी। न च विद्यासमो बंधुर्नास्ति कश्चि
द्गुरोः परः। विद्यादाता पुत्रदाता गुरुस्तस्मान्नात्र संशयः। गुरुस्त्रीणां यांच पुत्रे च बन्धूवरा महेलनं। परंस
मार्जनं कर्त्तुमागतोहं तवालयं। नारायण उवाच। इत्येवमुक्त्वा तां भुच दुर्गां सभ्यन्नारद। उवाच तन्न गः
वांस्तत्र सात्यं सारं परं वच। विष्णुरुवाच। शृणु देवि प्रवक्ष्यामि मदीयं वचनं शुभे। हितं नीतं वेदसारं
परं नामसुखावहं। यथा ते गजवक्त्रश्च पार्वति कार्तिकेयश्च पार्वति। रामस्तथा ते पुत्रो पितास्त्येषु स्नू
नतास्मृति। नास्त्येषु स्नेहभेदश्च तव वा शंकरस्य च। विचार्य सर्वं सर्वज्ञे कुरु मालयथोचितं। पुत्रे ११६
णमार्ष्टं पुत्रस्य विवादो देवदोषतः। देवं हं तु कोपि शक्ति दैवं च बलवत्परं। पुत्राभिधानं वेदेषु पत्रपव
सेवाराननं एकदंतं इति ख्यातं सर्वदेवनमस्कृतं। पुत्रनामाष्टकं स्तोत्रं सामवेदोक्तमीश्वरी। शृणु

ष्वावहितं मत्तः सर्वविघ्नहरं परं। विष्णुरुवाच। गणेशमेकदंतं हेरंबं विघ्ननायकं। लंबोदरं शूर्पक
र्णं गजवक्त्रं गुहाग्रजं। नामाष्टकार्थं पुत्रस्य शृणु त्वं हरप्रिये। स्तोत्राणां सारभूतं च सर्वविघ्नहरं प
रं। ज्ञानार्थवाचको गश्च णश्च निर्वाणवाचकः। तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहं। एकशब्दः प्रधाना
र्थो दंतश्च बलवाचकः। बलं प्रधानं सर्वस्मादेकदंतं नमाम्यहं। दीनार्थवाचको हेरंबः पालनवाचकः। प
रिपालकं दीनानां हेरंबं प्रणमाम्यहं। विपत्तिवाचको विघ्नो नायकः खंडनार्थकः। विपत्खंडनकं का
रं तं नमामि विघ्ननायकं। विष्णुदत्तैश्च नैवेद्यैर्यस्य लंबोदरं पुरा। पित्रा दत्तैश्च विविधैर्वंदे लंबोदरं च
तं। शूर्पाकारौ च यत्कर्णौ विघ्नवारणकारणौ। संपदास्या स्वरूपौ च शूर्पकर्णं नमाम्यहं। विष्णुप्रसा
दपुष्पं च यन्मूर्ध्नि मुनिदत्तकं। तद्गजेंद्रवक्त्रयुतं गजवक्त्रं नमाम्यहं। गुहस्याग्रे च जातोयमाविर्भूतो हरे
गृहे। वंदे गुहाग्रजं देवं सर्वदेवाग्रपूजितं। एतन्नामाष्टकं दुर्गे नामार्थसंयुतं परं। पुत्रस्य पश्य वेदे च

तथा कोपं दृष्ट्वा कुरु ॥ एतन्नामाष्टकं स्तोत्रं नामार्थसंयुतं शुभं ॥ त्रिःसंध्यः पठेन्नित्यं स सुखी सर्वतो जय
यी ॥ ततो विघ्नाः पलायंते वैनतेयाद् यथोरगाः ॥ गणेश्वरप्रसादेन महाज्ञानी भवेद्ध्रुवं ॥ पुत्रार्थी लभते
पुत्रं भार्यार्थी विपुलां स्त्रियं ॥ महाजडः कवीन्द्रश्च विद्यावादो भवेद्ध्रुवं ॥ ॥ इति श्रीब्रह्मवैवर्ते महा
पुराणे गणपतिखंडे गणेशस्तोत्रकथनं नाम चतुश्चत्वारिंशत्तमोऽध्यायः ॥ ॥ नारायण उवाच ॥ पार्व
ती बोधयित्वा तु विष्णु राममुवाच ह ॥ राम त्वमधुना सत्यमपराधी श्रुतेर्मतः ॥ कोपात्कृत्वा दंतभंगं गणे
शस्य स्थिते शिवे ॥ मयोक्तेनैव स्तोत्रेण स्तुत्वा गणपतिं परं ॥ काण्वशाखोक्तस्तोत्रेण स्तौहि दुर्गां जग
त्प्रसूं ॥ श्रीकृष्णस्य पराशक्तिर्बुद्धिरूपा जगत्प्रभो ॥ अस्यां च त्वं रुष्टायां हतबुद्धिर्भविष्यसि ॥ सर्वशा ॥ ११७ ॥
क्तिस्वरूपेयं मनसा या शक्तिमज्जगत् ॥ अनया शक्तिमान् कृष्णो निर्गुणः प्रकृतेः परः ॥ सृष्टिं कर्तुं न शक्त
श्च कृष्णः शक्त्या न या विना ॥ देवा यमस्याः प्रसूताश्च ब्रह्मविष्णुमहेश्वराः ॥ सुरसंघो सुरश्रेष्ठ काल

घोरतरे द्विज ॥ तेजःसु सर्वदेवानां सा वै भूत्वा सा पुरा सती ॥ कृष्णाज्ञया सुरान् हत्वा दत्त्वा देवेभ्यः पदं गतं ॥ द
क्षकन्या जनित्वेह दक्षस्थले या सपुरा ॥ भार्या भूता शंकरस्य पुनः पत्युश्च निंदया ॥ देहं त्यक्त्वा शैलपत्न्यां
जनित्वेह पुनः सती ॥ शंकरस्तपसा लब्धो योगीन्द्राणां गुरोर्गुरुः ॥ लब्धो गणपतिः पुत्रः कृष्णांशः कृष्ण
सेवया ॥ यमेव ध्यायसे नित्यं तं न जानासि बालकः ॥ स एव भगवान् कृष्णः कृष्णांशेन पार्वतीसुतः ॥ पुटांज
लीं स्तोत्रं स्तौहि त्वं दुर्गां शिवप्रियां ॥ शिवां शिवप्रदां शैवां शिवबीजां शिवेश्वरीं ॥ शिवयोः स्तोत्रराजे
न कृष्णेन भक्तिनापुरा ॥ त्रिपुरस्य वधे घोरे ब्रह्मणा प्रेरितेन च ॥ इत्युक्त्वा श्रीपदं शीघ्रं जगाम श्री
निकेतनः ॥ गते हरौ वै स हरिः स्मृत्वा राममस्तोत्रं तु मुद्यतः ॥ विष्णुदत्तेन स्तोत्रेण सर्वविघ्नहरेण च ॥ धर्मा
र्थकाममोक्षाणां कारणेन च नारदः ॥ पुटांजलिपुटो भूत्वा स्नात्वा गंगोदके शुभे ॥ गुरुं प्रणम्य भक्तेशं
धृत्वा धौते च वाससी ॥ आचम्य नत्वा मूर्ध्ना तां भक्त्या नम्रात्मकंधरः ॥ पुलकांकितसर्वांगश्चानंदाश्रुस

मन्वितः । परशुरामउवाच । श्रीकृष्णस्य च गोलोके परिपूर्णतमस्य च । आविर्भूता विग्रहतः पाशस्र
सुंमुखस्य च । सूर्य्यकोटिप्रभायुक्ता रत्नालंकारभूषिता । वह्निशुद्धांशुकाधाना सस्मिता सुमनोहरा ॥
नवयौवनसंपन्ना सिंदूरबिंदुशोभिता । ललिताकबरीभारं मालतीमाल्यमंडितं । अहो निर्वचनीया त्वं चा
र्वाकं मूर्त्तिं च बिभ्रती । मोक्षप्रदा मुमुक्षूणां महाविष्णोर्विधिः स्वयं । मुमोह क्षणमात्रेण दृष्ट्वा तां सर्वमोहनी । श
सेसंभूय सहसा सस्मिता राधिता पुरा । सद्भिः ख्याता तेन राधा मूलप्रकृतिरीश्वरी । कृष्णस्तां सहसाज्ञाय
वीर्य्याधानं चकार ह । ततो डिंभं महज्जज्ञे यतो भूतो महान्विराट् । यस्यैव लोमकूपेषु ब्रह्मांडान्यखिलानि
च । ततः शृंगारक्रमेणैव तन्निश्वासो बभूव ह । ततस्त्वं पंचधाभूयः पंचमूर्त्तिं च बिभ्रती । प्राणाधिष्ठात्री या ॥११८॥
मूर्त्तिः कृष्णस्य परमात्मनः । कृष्णप्राणाधिकां राधां तां वदंति पुराविदः । वेदाधिष्ठात्री मूर्त्तिर्वेदशास्त्रप्र
सूरपि । तां सावित्रीं शुद्धरूपां प्रवदंति मनीषिणः । ऐश्वर्य्याधिष्ठात्री या मूर्त्तिः शांतिश्च शांतिरूपिणी

लक्ष्मीं वदंति संतस्तां शुद्धसत्त्वस्वरूपिणीं । रागाधिष्ठात्री या देवी शुक्लमूर्त्तिः सतां प्रसूः । सरस्वतीं तां शास्त्र
ज्ञं शास्त्रज्ञाः प्रवदंत्यहो । बुद्धिर्विद्या सर्वशक्तिया क्तिरधिदेवता । सर्वमंगलदां संतो वदंति सर्वमंगलां ।
सर्वमंगलमांगल्या सर्वमंगलरूपिणी । सर्वमंगलबीजस्य शिवस्य मंदिरे धुना । शिवे शिवास्वरू
पा त्वं लक्ष्मीर्नारायणांतिके । सरस्वती च सावित्री वेदसूर्ब्रह्मणः प्रिया । राधा रासेश्वरस्यैव परिपूर्ण
तमस्य च । परमानंदरूपस्य परमानंदरूपिणी । छाया सूर्य्यस्य चंद्रस्य रोहिणी सर्वमोहिनी । शची शक्र
स्य कामस्य कामिनी रतिरीश्वरी । वरुणानी जलेशस्य वायोः स्त्री प्राणवल्लभा । वह्नेः प्रिया या स्वाहा च कु
वेरस्य सुंदरी । यमस्य च सुशीला च नैरृतस्य कैटभी ईशानस्य शशीकला शतरूपा मनोः प्रिया । देव
हूती कर्दमस्य वशिष्ठस्याप्यरुंधती । अदितिर्देवमाता या मुद्रागस्त्यस्य मुनेः प्रिया । अहल्या गौतमस्य
स्यापि सर्वाधारा वसुंधरा । गंगा च तुलसी चापि पृथिव्यां याः सरिद्वराः । एताः सर्वाश्च या अन्याः स

वह्निस्त्वं कल्पयांतिके। गृहे लक्ष्मीर्गृहेस्त्रणां राजलक्ष्मीश्च राजसु। तपस्वीनां तपस्या त्वं गायत्री ब्राह्मण
स्य च। सतां सत्यस्वरूपा त्वमसतां कलहांकुरा। ज्योतिस्वरूपा निर्गुणस्य शक्तिस्त्वं सगुणस्य च। सूर्ये
प्रभास्वरूपा त्वं दाहिका च हुताशने। जले शैत्यस्वरूपा च शोभारूपा निशाकरे। त्वं भूमौ गंधरूपा च ग
गनाकशब्दरूपिणी। क्षुत्पिपासादयस्त्वं च जीवीनां सर्वशक्तयः। सर्वबीजस्वरूपा त्वं संसारे साररू
पिणी। स्मृतिर्मेधा च बुद्धिर्वा ज्ञानशक्तिविपश्चितां। कृष्णेन विद्या या दत्ता सर्वज्ञानप्रसूः शुभा। शू
लिने कृपया सा त्वं यातो मृत्युंजयः शिवः। सृष्टिपालनसंहारशक्तयस्त्रिविधाश्च या। ब्रह्मविष्णुम
हेशानां सा त्वमेव नमोस्तु ते। मधुकैटभभीतावत्रस्तो धाता प्रकंपितः। स्तुत्वा मुमोच यां देवीं तां मूर्ध्ना प्र
णमाम्यहं। मधुकैटभयोर्युद्धे त्रातोसौ विष्णुरीश्वरः। बभूव शक्तिमांस्तुत्वा यां दुर्गां तां नमाम्यहं। त्रिपु ॥१३८॥
रस्य महायुद्धे सरथे पतिते शिवे। यां तुष्टुवुः सुराः सर्वे तां दुर्गां प्रणमाम्यहं। विष्णुना वृषरूपेण स्व

यं शंभुः समुत्थितः। जघान त्रिपुरं स्तुत्वा यां दुर्गां तां नमाम्यहं। यदाज्ञया वाति वातः सूर्यस्तपति संततं। व
र्षतीन्द्रो दहत्यग्निस्तां दुर्गां प्रणमाम्यहं। यदाज्ञया च कालश्च शश्वद्भ्रमति वेगतः। मृत्युश्चरति जंतौघे तां
दुर्गां प्रणमाम्यहं। स्रष्टा सृजति सृष्टिं च धाता पाति यदाज्ञया। संहर्ता संहरेत्काले तां दुर्गां प्रणमाम्यहं।
ज्योतिःस्वरूपो भगवान् श्रीकृष्णो निर्गुणः स्वयं। यया विना न शक्तश्च सृष्टिं कर्तुं नमामि तां। रक्ष रक्ष जग
न्मातरपराधं क्षमस्व मे। शिशूनामपराधेन तांश्च माता न कुप्यति। इत्युक्त्वा पर्शुरामश्च प्रणम्य तां
रुरोद च। तुष्टा दुर्गा संभ्रमेण चाभयं च वरं ददौ। अमरो भव रे पुत्र वत्स सुस्थिरतां व्रज। सर्वप्रसादात्स
र्वत्र जयोस्तु तव संततं। सर्वांतरात्मा भगवांस्तुष्टोस्तु सततं हरिः। भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गु
रौ। इष्टदेवे गुरौ यस्य भक्तिर्भवति शाश्वती। तं हंतुं न हि शक्ताश्च रुष्टाश्च सर्वदेवताः। श्रीकृष्णस्य च भक्तस्त्वं
शिष्यश्च शंकरस्य च। गुरुपत्नीं नयात्सौ हि कस्त्वां हंतुमिहेश्वरः। अहो न कृष्णभक्तानामशुभं विद्यते

क्वचित् ॥ अन्यदेशेषु नक्तान नक्तावणिर क्रूरा ॥ चंद्रमावल्लभोस्कष्टो येषांनागपंवतांच्छीगो ॥ तेषां
नाभ्यगणारूष्टाकिंकुर्वंतिचदुर्वला ॥ यस्यतुष्टः सचयामाचेन्नरदेवोमहान्सुखी ॥ तस्यकिंवाकरिष्यंति
रुष्टान्नन्याश्चदुर्वला ॥ इत्युक्त्वा पार्वतीतुष्टा दत्त्वाराम्ंस्तुनाशिषं ॥ जगामांतःपुरंतूर्णंहरिश्चाश्रेवभूव
ह ॥ कएवशास्त्रोक्तस्तोत्रंचपूजाकालेचयःपठेत् ॥ यात्राकालेचप्रातर्वावांछितार्थंलभेध्रुवं ॥ पुत्रा
र्थीलभतेपुत्रंकन्यार्थीकन्यकांलभेत् ॥ विद्यार्थीलभतेविद्यांप्रजार्थीलभतेप्रजां ॥ भ्रष्टराज्योलभेद्रा
ज्यंधनंभ्रष्टाधोलभेत् ॥ यस्यतुष्टोगुरोदेवोराजावाबांधवोथवा ॥ तस्यतुष्टश्चवरदःस्तोत्रराजप्रसाद
तः ॥ दस्युग्रस्तोहियस्तश्चशत्रुग्रस्तोभयानकः ॥ व्याधिग्रस्तोभवेन्मुक्तःस्तोत्रस्मरणमात्रतः ॥ राजद्वारेश्म ॥१२७॥
शानेचकारागारेचबंधने ॥ जलराशौनिमग्नश्चमुक्तोभवतिस्तोत्रतः ॥ स्वामिभेदेपुत्रभेदेमित्रभेदेतिदा
रुणे ॥ स्तोत्रस्मरणमात्रेणवांछितार्थंलभेध्रुवं ॥ कृत्वाहविष्यंवर्षंचस्तोत्रराजंशृणोतिया ॥ भक्त्यादु

र्गांचसंपूज्यमहावंध्याप्रसूयते ॥ लभतेसादिव्यपुत्रंज्ञानीनांचिरजीविनं ॥ असौनागपाचसौनागपंच
णमासश्रवणाद्भवेत् ॥ नवमासंचकाकवंध्यामृतवत्साचभक्तितः ॥ स्तोत्रराजंयाशृणोतिसापुत्रंलभते
ध्रुवं ॥ कन्यामातापुत्रहीनापंचमासंशृणोतिया ॥ घटेसंपूज्यदुर्गांचसापुत्रंलभतेध्रुवं ॥ ॥ इतिश्री
ब्रह्मवैवर्तेमहापुराणेगणपतिखंडेदुर्गास्तोत्रंनामपंचचत्वारिंशोऽध्यायः ॥ ॥ ॥
॥ ॥ नारायणउवाच ॥ ॥ स्तुत्वादुर्गांपर्शुरामोहर्षविह्वलमानस ॥ हरिणोकेनस्तोत्रेणसंतुष्टाबग
णेश्वरं ॥ पूजांचकारभक्त्याचनैवेद्यैर्विविधैरपि ॥ धूपैर्दीपैश्चपुष्पैश्चतुलसीविना ॥ संपूज्यत्वातरं
भक्त्यासरामःशंकराज्ञया ॥ गुरुपत्नींगुरुंनत्वा गमनंकर्तुमुद्यतः ॥ नारदउवाच ॥ पूजांगणेशस्य भगवत
केरामोगणपतेर्यदा ॥ नैवेद्यैर्विविधैःपुष्पैस्तुलसीचविनाकथं ॥ तुलसीसर्वपुष्पाणांमान्याधन्याम
नोहरा ॥ कथंपूतांसारभूतांनगृह्णातिगणेश्वर ॥ ब्रह्मकल्पस्यवृत्तांतंनिगुढंचमनोहरं ॥ एकदातुलसा

देवी प्रोद्भिन्नयौवनान्विता ॥ नारायण उवाच ॥ शृणु नारद वक्ष्येहमितिहासं पुरातनं ॥ तीर्थं भ्रमंती
तपसा नारायणपरायणा ॥ ददर्श गंगातीरे च गणेशं यौवनान्वितं ॥ अतीव सुंदरं शुद्धं सस्मितं पीतवा
ससं ॥ चंदनोक्षितसर्वांगरत्नभूषणभूषितं ॥ ध्यायंतं कृष्णपादाब्जं जन्ममृत्युजरापहं ॥ जितेंद्रियाणां
प्रवरं योगींद्राणां गुरोर्गुरुं ॥ अरूपहार्यं निकामं सकामा तमुवाच ह ॥ तुलस्युवाच ॥ अयि किं ध्या
यसे देवेशं त्वं रूपं गजाननं ॥ कथं लंबोदरं त्वेहो गजवक्त्रं कथं तव ॥ एकदंतः कथं वक्रे वद मुख्यं च कार
णं ॥ त्यज ध्यानं महाभाग सायंकाल उपस्थित ॥ इत्युक्त्वा तुलसी तत्र जहास च पुनः पुनः ॥ पुरा चेतसि
दग्धा सा कामबाणैः सुदारुणैः ॥ गणेशस्य प्रधानांगे दत्वा किंचिज्जलं मुने ॥ जघान तज्जलाग्रेण निष्कं ॥१२३॥
कस्ममानसं ॥ बभूव ध्यानभंगश्च तस्य नारद चेतनं ॥ दुःखं च ध्यानभंगेन समद्विच्छेदे हि को शोकतः
ध्यानं त्यक्त्वा हरिं स्मृत्वा ददर्श कामिनीं पुरः ॥ नवयौवनसंपन्नां सस्मितां कामपीडितां ॥ लंबोदरस्तां

दृष्ट्वा परं विनयपूर्वकं ॥ उवाच सस्मितः शांतः शांतां कामातुरां वशी ॥ गणेश्वर उवाच ॥ का त्वं वत्से कस्य
कन्ये मातर्मां ब्रूहि किं शुभे ॥ पापदोऽशुभदः शश्वद्ध्यानभंगस्तपस्विनां ॥ कृष्ण करोतु कल्याणं हंतु विघ्नं
कृपानिधिः ॥ मत्कृध्यानभंगजो दोषो नाशो भवतु ते शुभे ॥ गणेश्वरं च वचनं श्रुत्वा तमुवाच स्मरातुरा
सस्मितं सकटाक्षं च वदेवं मधुरया गिरा ॥ तुलस्युवाच ॥ धर्मध्वजस्य कन्याहमप्रौढा च तपस्विनी ॥ तपस्या
मे स्वामिनोऽर्थं त्वं स्वामी भव मे प्रभो ॥ तुलसीवचनं श्रुत्वा गणेशः श्रीहरिं स्मरन् ॥ तामुवाच महाप्राज्ञः
प्राज्ञा मधुरया गिरा ॥ गणेश्वर उवाच ॥ हे मातर्नास्ति मे वांछा घोरे दारपरिग्रहे ॥ दारग्रहो हि दुःखाय न सु
खाय कदाचन ॥ हरिभक्तिव्यवधायकस्तपसां नाशहेतुकः ॥ मोक्षद्वारकपाटश्च भवबंधनपाशकः ॥
गर्भवासकरः शश्वत्तत्त्वज्ञाननिकृंतनः ॥ संशयानां समारंभो दुःस्त्यज्यो वृषभैरपि ॥ गेहाहंकारणा
नां च सर्वमायाकरंटकः ॥ साहसानां समूहश्च दोषाणां च विशेषतः ॥ निवर्त्तस्व महाभागे पश्यान्यं

कामुकं पतिं। कामुकेनैव कामुका। संगमो गुणवान् भवेत्॥ इत्येवं वचनं श्रुत्वा कोपतस्तं शशा
प ह। सा च ग्रहस्तिन्न विलासा साध्वीति गणेश्वर॥ इत्याकर्ण्य सुरश्रेष्ठस्तां शशाप शिवात्मजः। देवि
त्वमसुरग्रस्ता भविष्यसि न संशयः॥ तत्पश्चान्महतां शापाद्वृक्षत्वं भवितेति च॥ महातपस्वीत्युक्ते
संविरराम च नारद॥ शापं श्रुत्वा तु तुलसी प्ररुरोद पुनः पुनः॥ उवाच च सुरश्रेष्ठं संप्रसन्न उवाच तां
गणेश्वर उवाच॥ पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे॥ कलांशेन महाभागे स्वयं नारायण
प्रिया॥ प्रिया त्वं सर्वदेवानां श्रीकृष्णस्य विशेषतः॥ पूता विमुक्तिदा नॄणां मम त्याज्या च सर्वदा॥ इत्युक्त्वा
तां सुरश्रेष्ठो जगाम तपसे पुनः॥ हरेराराधनव्यग्रो बदरीसन्निधिं ययौ॥ जगाम तुलसी देवी हृदयेन विदू १२३
यता॥ निराहारा तपश्चक्रे पुष्करे लक्षवत्सरं॥ पश्चान्मुनींद्र शापेन गणेशस्य च नारद॥ सा प्रिया
शंखचूडस्य बभूव सुचिरं मुने॥ ततः शंकरशूलेन सममारासुरेश्वरः॥ सा कलांशेन वृक्षत्वं स्वयं ना

रायणप्रिया॥ कथितश्चेतिहासस्ते श्रुतं तो धर्ममुखात्पुरा॥ मोक्षप्रदश्च सारश्च पुराणेन प्रकीर्त्तितः॥ प
श्चाद्रामो महाभागो जगाम तपसे वनं॥ प्रणम्य शंकरं दुर्गां संपूज्य च गणेश्वरं॥ पूजितो वंदितः सर्वैः सुरे
न्द्रैर्मुनिपुंगवैः॥ पार्वतीशिवसान्निध्ये तत्रस्थो गणेश्वरः॥ इदं गणपतेः खंडं यः शृणोति समाहितः॥ राजसू
यस्य यज्ञस्य फलमाप्नोति निश्चितं॥ अपुत्रो लभते पुत्रं श्रीगणेशप्रसादतः॥ धीरं धीरं च धनिनं गुणि
नं चिरजीविनं॥ यशस्विनं पुत्रिणं च विद्यासंयुक्कवीश्वरं॥ जितेंद्रियाणां प्रवरं दातारं सर्वसंपदां॥ सु
पवित्रं सदाचारं प्रशंस्यं वैष्णवं भवे॥ अहिंसकं दयालुं च तत्त्वज्ञानविशारदं॥ भक्त्या गणेशं संपूज्य वस्त्रा
लंकारचंदनैः॥ श्रुत्वा गणपतेः खंडं महावंध्या प्रसूयते॥ मृतवत्सा काकवंध्या ब्रह्मन् पुत्रं लभेद्ध्रुवं॥
या दुःषिता दुःषिता या सा च शुद्धा भवेद्ध्रुवं॥ कांस्यं च ब्रह्मवैवर्त्तं श्रुत्वा यत्तल्लभते फलं॥ तत्फलं लभते म
र्त्यः श्रुत्वेदं खंडमुत्तमं॥ वांछां कृत्वा तु मनसि शृणोति परमास्तिकः॥ तस्मै ददाति सर्वेष्टं सुरश्रेष्ठो गणेश्व

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ग॰ पु॰

॥१२३॥ २:॥ ॥इतिश्रीब्रह्मवैवर्तेमहापुराणेनारायणनारदसंवादेगणपतिखंडेषट्
चत्वारिंशोऽध्यायः॥ ॥ ॥समाप्तश्चायंगणपतिखंडः॥ ॥
॥ ॥शुभंभवतु॥ ॥कल्याणमस्तु॥ ॥श्रीरस्तु॥ ॥
॥ ॥ ॥ ॥ ॥छ॥ ॥ ॥ ॥ ॥
॥ ॥लेखकपाठकयोःशुभंभवतु॥ ॥ ॥

॥१२३॥